Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 230 OLD 207

FOLIO 066

TITLE

1. कारिकावलीसहित मुक्तावली ।
2. गोविन्दकारिका टिप्पणी ।

अथकारिकावलीसहितसिद्धान्तमुक्तावलीप्रारभ्यते

श्रीगणेशायनमः ॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः ॥ भवोभवतुभव्यायलीलातांडवपंडितः ॥१॥ निजनिर्मितकारिकावली
मतिसंक्षिप्तचिरंतनोक्तिभिः ॥ विशदीकरवाणि कौतुकान्ननुराजीवदृशावशंवदः ॥२॥ सद्व्याख्यागुणगुंफितासुकृतिनांसत्कर्मणां –
ज्ञापिकासत्सामान्यविशेषनित्यमिलिताभावप्रकाशज्वला ॥ विष्णोर्वक्षसिविश्वनाथकृतिनासिद्धांतमुक्तावली विन्यस्तामनसो
मुदंवितनुतांसद्युक्तिरेषाचिरं ॥३॥ विघ्नविघाताचकृतंमंगलंशिष्यशिक्षायैनिबध्नाति ॥ नूतनेत्यादि ॥ ननुमंगलेनविघ्नध्वंसंप्र
तिनवासमाप्तिंप्रतिकारणं ॥ विनापिमंगलंनास्तिकादीनांग्रंथैनिर्विघ्नपरिसमाप्तिदर्शनादितिचेन्न ॥ अविगीतशिष्टाचारविषयत्वेन
मंगलस्यसफलत्वेसिद्धेतत्रचफलजिज्ञासायांसंभवतिदृष्टफलकत्वेअदृष्टकल्पनायाअन्याय्यत्वादुपस्थितत्वात्समाप्तिरेवफलं

नूतनजलधररुचयेगोपवधूटीदुकूलचौराय ॥

कल्प्यते ॥ इत्यंचयत्रमंगलंनदृश्यतेतत्रापिजन्मांतरीयंतत्कल्प्यते ॥ यत्रचसत्यपिमंगलेसमाप्तिर्नदृश्यतेतत्रचबलवत्तरोविघ्नो
विघ्नप्राचुर्यंवाबोध्यं ॥ प्रचुरतरस्यास्यैवबलवत्तरविघ्ननिवारणेकारणत्वंबोध्यं ॥ विघ्नध्वंसस्तुमंगलस्यद्वारमित्याहुः ॥ नव्यास्तुवि
घ्नध्वंसएवमंगलस्यफलं ॥ समाप्तिस्तुबुद्धिप्रतिभादिकारणकलापात् ॥ नचस्वतःसिद्धविघ्नविरहवताकृतस्यमंगलस्यनिष्फलत्वा
पत्तिरितिवाच्यं ॥ दृष्टापत्तेः ॥ विघ्नशंकयातदाचरणात् ॥ तथैवशिष्टाचारात् ॥ नचतस्यनिष्फलत्वेशिष्टाचारानुपपत्तिर्बाधकेवदस्या
प्रामाण्यापत्तिरितिवाच्यं ॥ सतिविघ्नेतन्नाशस्यैववदबोधितत्वात् ॥ अतएवपापभ्रमेणकृतप्रायश्चित्तस्यनिष्फलत्वेपिनवेदाप्रामा
न्ये ॥ क्वचिच्चविघ्नात्यंताभावएवसमाप्तिसाधनं ॥

प्रतिबंधकसंसर्गाभावस्यैवकार्यजनकत्वात्॥इत्थंचनास्तिकादिकृतग्रंथेषुजन्मांतरीयमंगलजन्यदुरितध्वंसः स्यतः सिद्धोविघ्नाद्यभा
भावोवास्तीतिनव्य भिचारइत्याहुः॥संसारेति॥संसारएवमहीरुहोवृक्षस्तस्यबीजायनिमित्तकारणायेत्यर्थः॥एतेनईश्वरेप्रमाण
दर्शितंभवति॥तथाहि॥यथाघटादिकार्यंकर्तृजन्यंतथाक्षित्यंकुरादिकमपि॥नचतत्कर्तृत्वमस्मदादीनांसंभवतीतितत्कर्तृत्वेने
श्वरसिद्धिः॥ नचशरीराजन्यत्वेनकर्त्रजन्यत्वसाधकेनसत्प्रतिपक्षेणेतिवाच्यं॥अप्रयोजकत्वात्॥ममतुकर्तृत्वेनकार्यत्वेन
कार्यकारणभावएवानुकूलस्तर्कः॥द्यावाभूमीजनयन्देवएकइत्यादयआगमाअप्यनुसंधेयाः॥द्रव्यंगुणइत्यादि॥अत्रसप्तम
स्याभावत्वकथनादेववर्णनाभावत्वंप्राप्तं॥तेनभावत्वेनपृथगुपन्यासोनकृतः॥एतेचपदार्थावैशेषिकसिद्धाःनैयायिकानामप्यविरु

तस्मैकृष्णायनमःसंसारमहीरुहस्यबीजाय॥१॥द्रव्यंगुणास्तथाकर्म
सामान्यंसविशेषकम्॥समवायस्तथाभावःपदार्थाःसप्तकीर्तिताः॥२

द्धाः॥प्रतिपादितंचैवमेवभाष्ये॥अतएवोपमानचिंतामणौसप्तपदार्थमिन्नतयाशक्तिसादृश्यादीतिरिक्तपदार्थत्वमाशंकितं॥ननुकथ
मेतएवपदार्थाःशक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्॥तथाहि॥मण्यादिसमवहितेनवन्हिनादाहोनजन्यते॥तच्छून्येननुजन्यते तत्रमण्यादिनावह्नौदाहानुकूलाशक्तिर्नाश्यते॥उत्तेजकेनमण्याद्यपसरणेनचजन्यतइतिकल्प्यते॥एवंसादृश्यमप्यतिरिक्तः पदार्थस्तद्धिनषट्सुभावेषुअंतर्भवति॥सामान्येपिसत्वात्॥यथागोत्वंनित्यंनथाश्वत्वमपीतिसादृश्यप्रतीतेः॥नाप्यभावेसत्वेनप्रतीयमानत्वादितिचेन्न॥मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकंप्रतिमण्यभावादेरेववास्तांत्रैगुण्यहेतुत्वंकल्प्यते॥अनेनैवसा

पदार्थी

मंजस्येअनेनशक्तितत्यागभावप्रध्वंसकल्पनानौचित्यात्॥नचोत्तेजकेसतिप्रतिबंधकसङ्भावेपिकथंदाह इतिवाच्यं॥उत्तेजकाभावविशिष्टमप्यभावस्यहेतुत्वात्॥एवंसादृश्यमपिनपदार्थान्तरं॥किंतुतद्भिन्नत्वेसतितद्गतभूयोधर्मवत्वं॥यथाचद्रुभिन्नत्वेसतिचंद्रगतात्ह्लादकत्वादिमत्त्वमुखेचंद्रसादृश्यमिति॥द्रव्याणिविभजते॥क्षित्यबिति॥क्षितिःपृथ्वीवीआपोजलानि तेजोवह्निः मरुद्व्योमकालःसमयःदिक्दिशादेहीआत्मामनइंद्रिय॥एतानिनवद्रव्याणीत्यर्थः॥ननुद्रव्यत्वजातौकिंप्रमाणं॥नहितत्रप्रत्यक्षंप्रमाणं॥घृतत्वतुप्रभृतिषुद्रव्यत्वाग्रहादितिचेन्न॥कार्यसमवायीकारणतावच्छेदकनयासंयोगस्यविभागस्यवासमवायीकारणता

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनोमनः॥द्रव्याण्यथगुणारूपंरसोगंधस्ततःपरं॥३॥स्पर्शसंख्यापरिमितिःपृथक्त्वञ्चततःपरम्॥संयोगश्चविभागश्चपरत्वञ्चापरत्वकम्॥४॥बुद्धिःसुखंदुःखमिच्छाद्वेषौयत्नोगुरुत्वकम्॥द्रवत्वस्नेहसंस्कारावदृष्टंशब्दएवच॥५॥उत्क्षेपणंततोपक्षेपणमाकुंचनन्तथा॥प्रसारणंचगमनंकर्माण्येतानिपंचच॥६॥

वच्छेदकनयातत्सिद्धेः॥ननुदशमंद्रव्यंतमःकुतोनोक्तंतद्धिप्रत्यक्षेणगृह्यते।तस्यचरूपवत्वात्कर्मवत्वाच्च॥तच्चगंधशून्यत्वान्न पृथिवी॥नीलरूपवत्वान्नजलादिकं॥तत्प्रत्यक्षेचालोकनिरपेक्षंचक्षुःकारणमितिचेन्न॥आवश्यकतेजोभावेनैवोपपत्तौद्रव्यांतर कल्पनायाअन्याय्यत्वात्॥रूपवत्ताप्रतीतिस्तूभ्रमरूपा॥कर्मवत्ताप्रतीतिरपिआलोकापसरणौपाधिकीभ्रांतिरेवतमसोऽतिरिक्तत्वे ऽनेतावयवादिकल्पनागौरवंचस्यात्॥सुवर्णस्यथातेजस्यंतर्भावस्तथाग्रेवक्ष्यते॥गुणान्विभजते॥अथगुणाइति॥एतेगुणाश्चतुर्विंशतिसंख्याकाःकणादेनकंठतश्चशब्देनचदर्शिताः॥तत्रगुणत्वजातिसिद्धिरग्रेवक्ष्यते॥कर्माणिविभजते॥उत्क्षेपणमिति॥कर्मत्व

ननुभ्रमणादिकमपिकर्माधिकतयाकुतोनोक्तमतआह॥भ्रमणमिति॥सामान्यंनिरूपयति॥सामान्यमिति॥तल्लक्षणंतु नित्यत्वेस
त्यनेकसमवेतत्वं॥अनेकसमवेतत्वंसंयोगादीनामप्य तउक्तंनित्यत्वेसतीति॥नित्यत्वेसतिसमवेतत्वंगगनपरिमाणादीनाम
प्यस्त्यतउक्तमनेकेति॥नित्यत्वेसत्यनेकवृत्तित्वंअत्यंताभाव याप्यस्यतोवृत्तित्वसामान्यंविहायसमवेतेत्युक्तं॥एकमात्रव्यक्तिवृ
त्तिस्तन्नजातिः॥तथाचोक्तं॥व्यक्तेरभेदस्तुल्यत्वंकरोत्यानवस्थितिः॥रूपहानिरसंबंधोजातिबाधकसंग्रहः॥द्रव्यादीति॥परत्वमधि
कदेशवृत्तित्वं॥अपरत्वंअल्पदेशवृत्तित्वं॥सकलजात्यपेक्षयाअधिकदेशवृत्तित्वात्सत्तायाःपरत्वं॥एतद्बोधनायैवद्रव्यादित्रि

भ्रमणंरेचनंस्यन्दनोर्ध्वज्वलनमेवच।तिर्यग्गमनमप्यत्रगमनादेवलभ्यते॥७॥सत्ताद्विविधंप्रोक्तंपरंचापरमे
वच॥द्रव्यादित्रिकवृत्तिस्तुसत्तापरतयोच्यते॥८॥परभिन्नातुयाजातिस्सैवापरतयोच्यते॥द्रव्यत्वादिकजातिस्तु
परापरतयोच्यते॥९॥व्यापकत्वात्परापिस्याद्व्याप्यत्वादपरापिच॥अन्त्योनित्यद्रव्यवृत्तिर्विशेषःपरिकीर्तितः॥१०

कवृत्तिरितिउक्तं॥तदपेक्षयाचान्यासाजातीनामपरत्वं।परभिन्ना॥सत्ताभिन्ना॥व्यापकत्वादिति॥पृथिवीत्वाद्यपेक्षयाव्यापकत्वा
दधिकदेशवृत्तित्वात्परत्वं॥सत्तापेक्षयाव्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वस्यापरत्वं॥तथाचधर्मेहूयसमावेशादुभयंमविरुद्धं
॥विशेषंनिरूपयति।अन्त्य इति॥अंतेअवसानेवर्ततइत्यन्त्यःयदपेक्षयाविशेषोनास्तीत्यर्थः॥घटादीनांद्व्यणुकपर्यंतानांतन्नद्रव
यवभेदात्परस्परभेदः॥परमाणूनांपरस्परभेदकोविशेषएव॥सतुस्वतएवव्यावृतः॥तेनतत्रविशेषांतरापेक्षानास्तीत्यर्थः॥

समवायंदर्शयति॥घटादीनामिति॥अवयवावयविनोःगुणगुणिनोः जातिव्यक्त्योः क्रियाक्रियावतोः नित्यद्रव्यविशेषयोश्चयः संबंधःससमवायः समवायत्वंनित्यसंबन्धत्वं॥तत्रप्रमाणंतुगुणक्रियादिविशिष्टबुद्धिः॥विशेषणविशेष्यसंबन्धविषया॥विशिष्टबुद्धित्वात्॥दंडीपुरुषइतिविशिष्टबुद्धिवत्॥दृत्यनुमानेनसंयोगादिबाधात्समवायसिद्धिः॥नचस्वरूपसंबन्धेनसिद्धसाधनमर्थांतरंवा॥अनेकस्वरूपाणांसंबन्धत्वकल्पनेगौरवात् लाघवादेकसमवायसिद्धिः॥नचसमवायस्यैकत्वेवायोरूपवत्ताबुद्धिप्रसंगः॥तत्ररूपसमवायसत्वेपिरूपाभावात्॥नचैवमभावस्यापिवैशिष्ट्यसंबंधांतरंसिध्येदितिवाच्यम्॥तस्यनित्यत्वेभूतलेघटानयनानेतरमपिघटाभावबुद्धिप्रसंगात्॥घटाभावस्यतत्रसत्वात्॥तस्यनित्यत्वात्॥अन्यथादेशांतरेपिघटाभाव

घटादीनांकपालादौद्रव्येषुगुणकर्मणोः॥तेषुजातेश्चसम्बन्धःसमवायःप्रकीर्तितः॥११॥अभावस्तद्विधान्योन्यसंसर्गाभावभेदतः॥

बुद्धिर्नस्यात्॥वैशिष्ट्यस्यचतत्रसत्वात्॥ममतुघटेपाकरक्तनाद्शायांश्यामरूपस्यनष्टत्वान्नतद्बुद्धिः॥वैशिष्ट्यस्यानित्यत्वेत्वनंतवैशिष्ट्यकल्पनेतवैवगौरवं॥इत्थंचतत्तत्कालीनंतत्तद्भूतलादिकंतत्तद्भावानांसंबंधः॥अभावंविभजते॥अभावस्त्विति॥अभावत्वंद्रव्यादिषट्कान्योन्याभाववत्वं।अन्योन्यसंसर्ग इति॥ -- अन्योन्यासंसर्ग -- भावभेदादित्यर्थः॥ भाव
अन्योन्याभावस्यैकविधत्वात्तद्धिभागाभावात्संसर्गाभावंविभजते॥

॥प्रागभावेति॥संसर्गाभावत्वंअन्योन्याभावभिन्नाभावत्वं॥अन्योन्याभावत्वंतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं॥विनाश्यभावत्वंप्रागभावत्वं॥जन्याभावत्वंध्वंसत्वं॥नित्यसंसर्गाभावत्वमत्यंताभावत्वं॥यत्रतुभूतलादौघटादिकमपसारितंपुनरानीतंचतत्रघटकालस्यसंबंधाघटकत्वादत्यंताभावस्यनित्यत्वेपिनघटकालेघटात्यंताभावबुद्धिः॥तत्रोत्पादविनाशशालीचतुर्थोयमभावइतिकेचित्॥अत्रध्वंसप्रागभावयोरधिकरणेनात्यंताभावोवर्त्ततइतिप्राचांमतं॥इहामघटेरक्तोनास्तिरक्तघटेश्यामोनास्तीतिप्रतीतिश्चप्रागभावध्वंसंचावगाहतेनतुतदत्यंताभावं॥नव्यास्तुतत्रविरोधेमानाभावात् ध्वंसादिकालावच्छेदेनात्यंताभावोवर्त्ततइत्याहुः॥ननु भावानामधिकरणात्मकत्वंलाघवादितिचेन्न॥अनंताधिकरणात्मकत्वापेक्षयाअतिरिक्तकल्पना

प्रागभावस्तथाध्वंसोप्यत्यंताभावएवच॥१२॥एवंत्रैविध्यमापन्नः
संसर्गाभावइष्यते॥सप्तानामपिसाधर्म्येज्ञेयत्वादिकमुच्यते॥१३॥

याएवलघीयस्त्वात्॥एवंचाधाराधेयभावोप्युपपद्यते॥एवंतत्तच्छब्दगंधरसाद्यभावानांप्रत्यक्षत्वमप्युपपद्यते॥अन्यथातत्तदधिकरणानांतत्तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वंनस्यात्॥एतेनज्ञानविशेषकालविशेषात्मकत्वंअभावस्येतिप्रत्युक्तं॥अप्रत्यक्षतापत्तेः॥इदानींपदार्थानांसाधर्म्यवैधर्म्येवक्तुमारभते॥सप्तानामिति॥समानोधर्मोयेषांतेसधर्माणस्तेषांभावः साधर्म्यंसमानोधर्मइतिफलितोर्थः॥एवंविरुद्धोधर्मोयेषांतेविधर्माणस्तेषांभावोवैधर्म्यंविरुद्धोधर्मइतिफलितोर्थः॥ज्ञेयत्वंज्ञानविषयतासाचसर्वत्रैवास्तिईश्वरज्ञानविषयतायाः केवलान्वयित्वात्॥एवमभिधेयत्वादिकंबोध्यम्॥ ॥

॥ द्रव्येति॥ द्रव्यगुणकर्मसामान्यविशेषाणांसाधर्म्यमनेकत्वंसमवायित्वंच॥ यद्यप्यनेकत्वमभावेप्यस्तितथाप्यनेकत्वेसतिभाव
त्वं पंचानांसाधर्म्यं॥तथाचानेकभाववृत्तिपदार्थविभाजकोपाधिमत्वंतदर्थस्तेनप्रत्येकंघटादीनाव्याप्तिः॥समवायित्वंसमवायसं
बंधेनसंबन्धित्वं नतुसमवायवत्वंसामान्यादावभावात्॥तथाचसमवेतवृत्तिपदार्थविभाजकोपाधिमत्वंफलितार्थः। तेननित्यद्रव्ये
षुनाव्याप्तिः॥सत्तावंतइति॥ द्रव्यगुणकर्मणांसत्तावत्वमित्यर्थः॥गुणादिरिति॥ यद्यपिगुणक्रियाशून्यत्वंभाद्यक्षणेघटादावति
व्याप्तंक्रियाशून्यत्वंचगगनादावतिव्याप्तम्॥ तथापिगुणवदवृत्तिधर्मवत्वंकर्मवदवृत्तिपदार्थविभाजकोपाधिमत्वंतदर्थः॥नहिष
टत्वादिकंद्रव्यत्वंवागुणवदवृत्तिकर्मवदवृत्तिकिंतुगुणत्वादिकंतथा॥ आकाशत्वादिकंतुनपदार्थविभाजकोपाधिः॥सामान्येति॥

द्रव्यादयःपंचभावाअनेकेसमवायिनः॥सत्तावंतस्त्रयस्त्वाद्याःगुणादिर्निर्गुणक्रियः॥१४॥सामान्य
परिहीनास्तुसर्वेजात्याद्योमताः॥ पारिमांडल्यभिन्नानोकारणत्वमुदाहृतम्॥१५॥ ॥ ॥

सामान्यानधिकरणत्वंसामान्यादीनामित्यर्थः॥पारिमांडिल्येति॥पारिमांडल्यंअणुपरिमाणंकारणत्वंतद्भिन्नानामित्यर्थः॥अणुप
रिमाणंतुनकस्यापिकारणं॥तद्धिस्वाश्रयारब्धद्रव्यपरिमाणारंभकंभवेत्॥तच्चनसंभवति॥परिमाणस्यस्वसमानजातियोत्कृष्ट
परिमाणजनकत्वात्॥महदारब्धस्यमहत्तरत्ववदणुजन्यस्याणुतरत्वप्रसंगात्॥एवंपरममहत्परिमाणंअतींद्रयसामान्यंविशेषाश्च
बोध्याः मानसप्रत्यक्षेआत्ममहत्वस्यकारणत्वात्परममहत्परिमाणमाकाशादेर्बोध्यम्॥तस्यापिनकारणत्वमित्याचार्यापामा
शयइत्यन्ये॥तन्न॥ज्ञानातिरिक्तंप्रतिअकारणतायाएवाचार्यैरुक्तत्वात्॥ इदमपियोगिप्रत्यक्षेविषयस्यनकारणत्वम्। ॥ ॥

ज्ञायमानसामान्यंनप्रत्यासत्तिः॥ज्ञायमानेलिंगेनानुमितिकरणमित्यभिप्रायेण॥ननुकारणत्वंकिमतआह॥अन्यथासिद्धिशून्यस्येति॥
तस्य॥कारणत्वस्य॥नत्रेति॥समवायिकारणेआसन्नंप्रत्यासन्नंजनकंद्वितीयंअसमवायिकारणमित्यर्थः॥अत्रयद्यपितुरीतंतुसंयोगेपटासमवा
यिकारणत्वंस्यादेवंवेगादीनामपिअभिघाताद्यसमवायिकारणत्वंस्यात्॥एवंज्ञानादिकमिच्छाद्यसमवायिकारणंस्यात्तथापिपटाद्यसमवायिकारण
लक्षणेतुरीतंतुसंयोगादिभिन्नत्वंदेयम्॥तुरीतन्तुसंयोगस्तुतुरीपटसंयोगंप्रतिअसमवायिकारणंभवत्येव॥एवंवेगादिकंवेगस्पं
दाद्यसमवायिकारणंभवत्येवेति॥तत्तत्कार्यसमवायिकारणलक्षणेतत्तद्भिन्नत्वंदेयमेव॥आत्मविशेषगुणानामनुकूलाद्यसमवा

अन्यथासिद्धिशून्यस्यनियतापूर्ववर्तिता॥कारणत्वंभवेत्तस्यत्रैविध्यंपरिकीर्तितं॥१६॥समवायिकारणत्वंज्ञेय
मथाप्यसमवायिहेतुत्वं॥एवंन्यायनयज्ञैस्तृतीयमुक्तंनिमित्तहेतुत्वं॥१७॥ यत्समवेतंकार्यंभवत्यवेहिसमवायि
जनकंतत्॥तत्रासन्नंजनकंद्वितीयमाभ्यांपरंतृतीयंस्यात्॥१८॥

यिकारणत्वंनास्तितेनतद्भिन्नत्वंसामान्यलक्षणे
देयमेव॥अत्रसमवायिकारणप्रत्यासन्नत्वंद्विविधं॥कार्यैकार्थप्रत्यासत्याकारणैकार्थप्रत्यासत्याच॥आद्यंयथा॥घटादिकंप्रतिकपा
लसंयोगादिकम्॥तस्यहिकार्येणघटेनसहएकस्मिन्कपालेप्रत्यासत्तिरस्ति॥द्वितीयंयथा॥घटरूपंप्रतिकपालरूपमसमवायिकारण
म्॥तत्रघटरूपंप्रतिकारणंघटस्तेनसहकपालरूपस्यैकस्मिन्कपालेप्रत्यासत्तिरस्ति॥तथाचक्वचित्समवायसंबंधेनक्वचित्समव
यिसमवायसंबंधेनेतिफलितोर्थः॥इत्थंचकार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्याकारणंज्ञानादिभिन्नमसमवायिकारणमि
तिसामान्यतोलक्षणंपर्यवसन्नं॥आभ्यांसमवायिकारणासमवायिकारणाभ्यांपरंभिन्नंकारणंतृतीयंनिमित्तकारणमित्यर्थः॥ ॥

इदानीमन्यथासिद्धत्वमेवकियतांपदार्थानांतदाह॥येनसहेति॥ ॥कार्यंप्रतिकारणस्यपूर्ववृत्तितायेनरूपेणगृह्यतेतत्कार्येण
तितद्रूपमन्यथासिद्धमित्यर्थः॥ यथाघटादिकंप्रतिदंडत्वादिकं॥द्वितीयमन्यथासिद्धमाह॥कारणमादायवायस्येति॥यस्यस्वा
तंत्र्येणान्वयव्यतिरेकौनस्तःकिंतुकारणमादायान्वयव्यतिरेकौगृह्येते॥तदन्यथासिद्धं॥यथादण्डरूपम्॥तृतीयमाह॥अन्यं
प्रतीति॥ अन्यंप्रतिपूर्ववृत्तित्वंगृहीत्वैवयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यतेतस्यतत्कार्यंप्रतिअन्यथासिद्धत्वम्॥यथाघटादिकं
प्रतिआकाशस्य तस्यहिघटादिकंप्रतिआकाशत्वेनैवकारणत्वंस्यात्॥आकाशत्वं शब्दसमवायिकारणत्वम्॥एवंचतस्यशब्दं

येनसहपूर्वभावःकारणमादायवायस्य॥ अन्यंप्रतिपूर्वभावेज्ञातेयत्पूर्वभाव
विज्ञानं॥१९॥ जनकंप्रतिपूर्ववर्त्तितामपरिज्ञायनयस्यगृह्यते॥ ॥ ॥

प्रतिकारणत्वंगृहीत्वैवघटादिकंप्रतिजनकत्वंग्राह्यम्॥अतस्तदन्यथासिद्धम्॥शब्दाश्रयत्वेनकारणत्वेकान्यथासिद्धिरिति
वेत्सत्यमितिगृहाण॥ अथआकाशस्यशब्दंप्रतिजनकत्वेकिमवच्छेदकमिति चेत्कत्वादिकंविशेषपदार्थोवेति॥चतुर्थमन्यथा
सिद्धमाह॥जनकंप्रतिपूर्ववृत्तितेति॥यत्कार्यंजनकंप्रतिपूर्ववृत्तित्वंगृहीत्वैवयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यते तस्यतत्कार्यं
प्रतिअन्यथासिद्धत्वम्॥ यथाकुलालपितुर्घटंप्रति ॥ तस्यकुलालपितृत्वेनघटंप्रतिजनकत्वेअन्यथासिद्धिः॥कुलालत्वेन
रूपेणजनकत्वेत्विष्टापत्तिः॥कुलालमात्रस्यघटंप्रतिजनकत्वात्॥ ॥

पंचममन्यथासिद्धमाह॥ अतिरिक्तमथापीति॥अवश्यकूप्तनियतपूर्ववर्त्तिनएवकार्यसंभवेतद्भिन्नंअन्यथासिद्धमित्यर्थः॥
अतएवप्रत्यक्षेमहत्त्वंकारणमनेकद्रव्यत्वमन्यथासिद्धम्॥तत्रहिमहत्त्वमवश्यकूप्तंतेनानेकद्रव्यत्वमन्यथासिद्धम्॥नचवै
परीत्येकिंविनिगमकमितिवाच्यम्॥महत्त्वत्वजातेःकारणतावच्छेदकत्वेलाघवात्॥ ॥रासभादिःस्यादितियद्यपितद्
घटव्यक्तिंप्रतिरासभस्यनियतपूर्ववृत्तित्वमस्तितथापिघटत्वजातीयंप्रतिसिद्धकारणभावैर्दंडादिभिरेवतद्घटव्यक्तेरपिसंभवेरासभोन्य
थासिद्धइतिभावः॥ ॥एतेष्विति॥ ॥एतेषुपञ्चस्वन्यथासिद्धेषुपञ्चमोन्यथासिद्धआवश्यकस्तेनैवपरेषांचरितार्थत्वात्॥तथा

अतिरिक्तमथापियद्भवेन्नियतावश्यकपूर्वभाविनः॥२०॥एतेपञ्चान्यथासिद्धादण्डत्वादिकमादिमम्॥घटादौदण्डरूपादिहेतौ
यमपिदर्शितम्॥२१॥तृतीयंतुभवेद्धीमकुलालजनकोपरः॥पञ्चमोरासभादिःस्यादेतेष्वावश्यकस्त्वसौ॥२२॥समवायिकार
णत्वंद्रव्यस्यैवेतिविज्ञेयम्॥गुणकर्मान्यवृत्तिज्ञेयमथाप्यसमवायिहेतुत्वं॥२३॥अन्यत्रनित्यद्रव्येभ्यआश्रितत्वमिहोच्यते ॥

हि॥दण्डादिभिरवश्यकूप्तनियतपूर्ववृत्तिभिरेवकार्यसंभवेद्दण्डत्वादिकमन्यथासिद्धम्॥नचवैपरीत्येकिंविनिगमकमितिवाच्यम्॥दण्डत्व
स्यैकारणत्वेदण्डघटितपरंपरायाःसम्बन्धत्वकल्पनेगौरवात्॥एवमन्येषामप्यनेनचरितार्थत्वंसंभवति॥समवायीति॥ स्पष्टम् ॥
॥गुणकर्मेति॥ असमवायिकारणत्वंगुणकर्मभिन्नानांवैधर्म्येनतुगुणकर्मणोः॥साधर्म्यमित्यत्रापितात्पर्यम्॥अथवाअसमवायि
कारणत्ववदृत्तिसत्ताभिन्नजातिमत्वंतदर्थः॥तेनज्ञानादीनामसमवायिकारणत्वविरहेपिनाव्याप्तिः॥अन्यत्रनित्यद्रव्येति॥नित्यद्र
व्याणिपरमाण्वाकाशादीनिविहायाश्रितत्वंसाधर्म्यमित्यर्थः॥आश्रितत्वंसमवायादिसम्बन्धेनवृत्तित्वम्॥विशेषणतयानित्यानामिकासा

इदानींद्रव्यस्यैवविशिष्यसाधर्म्यंवक्तुमारभते॥क्षित्यादीनामिति॥क्षितिर्जलमिति॥पृथिव्यग्नेजोवायुमनसांपरत्वापरत्ववत्त्वं मूर्त्तत्ववत्त्वंक्रियावत्त्ववेगवत्त्वंचसाधर्म्यम्॥नचयत्रघटादौपरत्वमपरत्वंवानोत्पन्नंतत्राव्याप्तिरितिवाच्यम्॥परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥मूर्त्तत्वंअपकृष्टपरिमाणवत्त्वम्॥नचैतेषामेव॥गगनादिपरिमाणस्यकुतोप्यपकृष्टत्वाभावात्॥पूर्ववत्कर्मवत्त्वंकर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्॥वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वंचबोध्यम्॥कालरवात्मेति॥कालरवात्मदिशाम्॥सर्वगतत्वम्॥सर्वमूर्त्तसंयोगित्वम्॥परममहत्वम्॥परममहत्वत्वम् जातिविशेषः॥अपकर्षानाश्रयपरिमाणत्वंवा॥क्षित्यादीति॥ ॥पृथिव्यग्नेजोवायोराकाशानांभूतत्वम्॥तच्चबहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्॥

क्षित्यादीनांनवानांतुद्रव्यत्वंगुणयोगिता॥२४॥क्षितिर्जलंतथातेजःपवनोमनएवच॥परापरत्वमूर्त्तित्वक्रियावेगाश्रयाअमी॥२५॥
कालरवात्मदिशांसर्वगतत्वंपरंमहत्॥क्षित्यादिपञ्चभूतानिचत्वारिस्पर्शवन्तिहि॥२६॥द्रव्यारंभ्यत्वंतुर्ष्वस्याद्यथाकाशशरीरिणाम्॥

अत्रग्राह्यत्वंलौकिकप्रत्यक्षस्वरूपयोग्यत्वंबोध्यम्॥तेनज्ञातोघटइतिप्रत्यक्षेज्ञानस्योपनीतभानविषयत्वात्तद्वृत्तिआत्मनिनातिव्याप्तिः॥नवाप्रत्यक्षाविषयरूपादिमतिपरमाण्वादावव्याप्तिः॥तस्यापिस्वरूपयोग्यत्वात्॥महत्त्वरूपकारणान्तरासन्निधानाच्चनप्रत्यक्षम्" अथवाआत्मावृत्तिविशेषगुणवत्त्वम्॥चत्वारीति॥ ॥पृथिव्यग्नेजोवायूनांस्पर्शवत्त्वम्॥द्रव्यारम्भइति॥ ॥पृथिव्यग्नेजोवायुषुचतुर्षुद्रव्यारम्भकत्वम्॥नचद्रव्यानारंभकघटादावव्याप्तिः॥द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥अथाकाशेति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ६

आकाशात्मनां अव्याप्यवृत्तिक्षणिकविशेषगुणवत्वम्॥ आकाशस्यविशेषगुणः शब्दःसचाव्याप्यवृत्तिः॥ यदाकिंचिदवच्छेदेनश
ब्दउत्पद्यते तदाअन्यावच्छेदेनतदभावस्यापिसत्वात्॥ क्षणिकत्वंचतृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्॥ योग्यविभूविशेषगुणा
नांस्वोत्तरवर्तीविभूविशेषगुणनाश्यत्वात्॥ प्रथमशब्दस्यद्वितीयशब्देननाशः॥ एवंज्ञानादीनामपि ज्ञानादिकंहि आत्मनिश्ची
यावच्छेदेनोत्पद्यते॥ तदान्यावच्छेदेनतदभावस्यापिसत्वात्॥ एवंज्ञानादिकमपिक्षणद्वयावस्थायि॥ इत्थंचाव्याप्यवृत्तिविशेष
गुणवत्वेक्षणिकविशेषगुणवत्वंचतदर्थः॥ पृथिव्यादौरूपादिविशेषगुणास्तीत्यव्याप्यवृत्तीत्युक्तम्॥ पृथिव्यादावव्याप्यवृत्तिः
संयोगादिरस्तीतिविशेषगुणेत्युक्तम्॥ नचरूपादीनामपिकदाचित्तृतीयक्षणेनाशसंभवात्क्षणिकविशेषगुणवत्वंक्षित्यादाव

॥अव्याप्यवृत्तिःक्षणिकोविशेषगुणइष्यते॥२७॥

तिव्याप्तमितिवाच्यम्॥ चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्वस्यतदर्थत्वात्॥ अपेक्षाबुद्धिःक्षणत्रयंतिष्ठति॥ क्षणच
तुष्टयंतुनकिमपिज्ञानादिकंतिष्ठति॥ रूपत्वादिकंतुक्षणचतुष्टयावस्थायिन्यपिरूपादौवर्त्ततदृतिनच्छेदासः॥ ईश्वरज्ञानस्य
चतुःक्षणवृत्तित्वाज्ज्ञानत्वस्यतद्वृत्तित्वाज्जन्येत्युक्तम्॥ यद्याकाशजीवात्मनोःसाधर्म्यंनदाजन्येतिनदेयम्॥ द्वेषत्वादिकमादाय
लक्षणसमन्वयात्॥ परममहत्वस्यतादृशगुणत्वाच्चतुर्थक्षणेहित्वादीनामपिनाशाभ्युपगमाद्धित्वादीनामपिनथात्वात्त
द्धारणायविशेषेति॥ त्रिक्षणवृत्तित्वंवाच्यम्॥ इच्छादिकमादायात्मनिलक्षणसमन्वयः॥

रूपद्रवत्वेति॥ पृथिव्यतेजसांरूपवत्त्वंद्रवत्ववत्त्वंप्रत्यक्षविषयत्वंचेत्यर्थः॥ नचचक्षुरादीनांभर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वेकिंमानमितिवाच्यम्॥ तत्रापितेजस्त्वादिनारूपानुमानात्॥एवंवाय्वानीतपृथिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपानुमानंबोध्यम्॥ नचघृतादौद्रुतसुवर्णादिभिन्नेतेजसिचद्रवत्ववत्त्वमव्याप्तमितिवाच्यम्॥ द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥ घृतजतुप्रभृतिषुपृथिवीषुजलेषुद्रुतसुवर्णादौतेजसिचद्रवत्वसत्त्वात् तत्रपृथिवीत्वादिसत्त्वादायसर्वत्रलक्षणसमन्वयः॥ नचप्रत्यक्षविषयत्वंपरमाण्वादावव्याप्तमतिव्याप्तंचरूपादाविति वाच्यम्॥ चाक्षुषप्रत्यक्ष

रूपद्रवत्वप्रत्यक्षयोगिनःप्रथमास्त्रयः॥ गुरुर्घृतेरसवतीद्वयोर्नैमित्तिको द्रवः॥२८॥ आत्मनोभूतवर्गाश्चविशेषगुणयोगिनः॥ यदुक्तंयस्यसाधर्म्येवैधर्म्येमितरस्यनत्॥२९॥ स्पर्शाद्योष्टौवेगाख्यःसंस्कारोमरुतोगुणाः॥स्पर्शाद्यष्टौरूपवेगौद्रवत्वंतेजसोगुणाः॥३०॥स्पर्शादयोष्टौवेगश्चद्रवत्वंचगुरुत्वकम्॥रूपंरसस्तथास्नेहोवारिण्येतेचतुर्दश॥३१॥ स्नेहहीनागंधयुताःक्षितावेतेचतुर्दश॥

विषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥आत्मन्यतिव्याप्तिवारणायचाक्षुषेति॥गुरुर्घृतीति॥ गुरुत्ववत्त्वंरसवत्त्वंचपृथिवीजलयोरित्यर्थः॥ नचघ्राणेन्द्रियादीनांवाय्वानीतपार्थिवभागानांचरसादिमत्त्वेकिंमानमितिवाच्यम्॥ तत्रापिपृथिवीत्वादिनातदनुमानात्॥ ॥द्वयोरिति॥ ॥पृथिवीतेजसोरित्यर्थः॥ नचनैमित्तिकद्रवत्ववत्त्वंघृतादौवह्न्यादौचाव्याप्तमितिवाच्यम्॥नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्व व्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥॥ ॥आत्मनइति॥ ॥पृथिव्यतेजोवाय्वाकाशात्मनांविशेषगुणवत्त्वमित्यर्थः॥यदुक्तमिति॥ ॥ ॥ ॥ ७

ज्ञेयत्वादिकंविहायेतिबोध्यं।नत्वनकस्यापिवैधर्म्येकेवलान्वयित्वात्॥स्पर्शादयइति।तेचसंख्यादयःपञ्चखेआकाशे॥साधर्म्यवैधर्म्याभ्यांनिरूप्यसम्प्रतिप्रत्येकंनिरूपयति॥तत्रक्षितिरित्यादिना॥गंधहेतुरिति॥गंधसमवायिकारणमित्यर्थः॥यद्यपिगंधवत्त्वमात्रंलक्षणमुचितंतथापिपृथिवीत्वजातौप्रमाणोपन्यासायकारणत्वमुपन्यस्तम्॥तथाहि॥पृथिवीत्वंगन्धसमवायिकारणतावच्छेदकतयासिध्यति॥अन्यथागंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः॥नचपाषाणादौगन्धाभावात्तद्गन्धवत्वमव्याप्तमितिवाच्यम्॥तत्रापिगंधसत्वात्॥अनुपलब्धिस्तुअनुत्कटत्वेनाप्युपपद्यते॥कथमन्यथातद्भस्मनिगन्धउपलभ्यते॥भस्मनोहिपाषाण

बुध्यादिषट्कंसंख्यादिपंचकंभावनातथा॥३२॥धर्माधर्मौगुणाएतेचात्मनःस्युश्चतुर्दश॥सङ्ख्यादिपञ्चकंकालदिशौशब्दश्चतेचरेव॥३३॥सङ्ख्यादयःपञ्चबुद्धिरिच्छायत्नोपिचेश्वरे॥परापरत्वेसंख्यादिपञ्चत्वेगश्चमानसे॥३४॥वायोर्नवैकादशतेजसोगुणाजलस्थितिप्राणभृतांचतुर्दश॥दिक्कालयोःपञ्चषडेवचाम्बरेमहेश्वरेशेमनसस्तथैवच॥॥३५॥तत्रक्षितिर्गन्धहेतुर्नानारूपवतीमता॥}ध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वंसिद्ध्यति॥यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतद्द्रव्यंतदुपादानोपादेयमितिव्याप्तेः॥दृष्टंचैतत्खण्डपटेमहापटध्वंसजन्ये॥इत्थंचपाषाणपरमाणोःपृथिवीत्वंतज्जन्यपाषाणस्यापिपृथिवीत्वम्॥तथाचतस्यापिगंधवत्वेबाधकाभावः॥नानारूपवतीति॥शुक्लनीलादिभेदेननानाजातीयरूपंपृथिव्यामेववर्त्तते॥नतुजलादौ॥तत्रशुक्लस्यैवसत्वात्॥पृथिव्यांत्वेकस्मिन्नपिधर्मिणिपाकजवशेननानारूपसंभवात्॥नचनानारूपंयत्रनोत्पद्यतेतत्राव्याप्तिः॥रूपद्रव्यवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यरूपनाशवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यवाविवक्षितत्वात्॥

वैशेषिकनये पृथिवीपरमाणौरूपनाश्यरूपान्तरस्यचसत्त्वात् न्यायनयेघटादावपितत्सत्त्वाल्लक्षणसमन्वयः॥ षड्विधइति॥मधुराम्लकटुकषायादिभेदेनयः षड्विधोरसःसपृथिव्यामेववर्त्तते॥जलेतुमधुरएवरसः॥ अत्रापिपूर्ववद्रसहूयवहूत्तिद्रव्यत्वव्याप्यजातिमत्त्वंलक्षणार्थोबोद्धव्यः॥द्विविधइति वस्तुस्थितिमात्रंननुद्विविधगन्धवत्त्वंलक्षणम् अधिकस्यव्यर्थत्वात् द्वैविध्यंचसौरभासौरभभेदेनबोध्यम्॥स्पर्शइति॥ तस्याःपृथिव्याः अनुष्णाशीतस्पर्शवत्त्वंवायावपिवर्त्ततेअतउक्तंपाकजइति॥इत्यन्वयः॥पृथिव्यास्पर्शोनुष्णाशीतइतिज्ञापनार्थमेतदुक्तम्॥पाकजस्पर्शवत्त्वमात्रंलक्षणंअधिकस्यवैयर्थ्यात्॥यद्यपिपाकजस्पर्शःपटादौनास्तितथापिपाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थोबोध्यः॥नित्येति॥सापृथिवीनित्याअनित्याचेत्यर्थः॥

षड्विधस्तूरसस्तत्रगन्धस्तूद्विविधोमतः॥३६॥स्पर्शस्तस्यास्तुविज्ञेयोह्यनुष्णाशीतपाकजः॥नित्यानित्याचसाद्वेधानित्यास्यादनुलक्षणा॥३७॥अनित्यातुतदन्यास्यात्सैवावयवयोगिनी॥॥

अणुलक्षणापरमाणुलक्षणापृथिवीनित्या॥तदन्यापरमाणुभिन्नापृथिवीद्व्यणुकादिःसर्वाप्यनित्येत्यर्थः॥सैव॥अनित्यापृथिवीएवअवयववतीत्यर्थः॥नन्ववयविनिकिंमानम्॥परमाणुपुञ्जैरेवोपपत्तेः॥नचपरमाणूनामतीन्द्रियत्वात्घटादेःप्रत्यक्षंनस्यात् इतिवाच्यम्॥एकस्यपरमाणोरप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वात्॥यथाएकस्यकेशस्यदूरेअप्रत्यक्षत्वेपितत्समूहस्यप्रत्यक्षत्वम्॥नचएकस्यूलोघटइतिबुद्धेरनुपपत्तेरितिवाच्यम्॥एकोमहान्धान्यराशिरितिवदुपपत्तेः॥नैवम्॥परमाणोरतीन्द्रियत्वेननत्समूहस्यापिरप्रत्यक्षत्वायोगात्॥दूरस्थकेशस्तूनातीन्द्रियः॥सन्निधानेतस्यैवप्रत्यक्षत्वात्॥नचतदानींदृश्यस्यपरमाणुपुञ्जस्यास्तन्न

त्वात्प्रत्यक्षत्वेपिअविरोधइतिवाच्यम्।अदृश्यस्यदृश्यानुत्पादकत्वात्।।अन्यथाचक्षुरूपादिसंततेरकदाचिदृश्यत्वप्रसङ्गात्।।नचाति
तप्ततैलादौकथमदृश्यदहनसंततेर्दृश्यदहनोत्पत्तिरितिवाच्यम्।।तत्रतदन्तःपातिभिर्दृश्यदहनावयवैःदृश्यदहनोत्पत्तेरभ्युपगमा
त्।नचादृश्येनद्व्यणुकेनकथंत्र्यसरेणोरुत्पत्तिरितिवाच्यम्।यतोनवयंदृश्यत्वमदृश्यत्वंवाकस्यचित्स्वभावादाचक्ष्महे।।परंतुमहत्त्वाङ्गृत
रूपादिकारणसमुदायवशात्तद्दृश्यत्वंतदभावेचादृश्यत्वम्।। तस्मात्त्र्यसरेणोर्महत्त्वात्प्रत्यक्षंननुद्व्यणुकादेःतदभावात्।।न
हित्वन्मतेपिद्वंद्वंसम्भवति।।परमाणोर्महत्त्वाभावात्।। दृश्यन्ह्यवयविसिद्धौतेषामुत्पादविनाशयोःप्रत्यक्षसिद्धत्वादनित्यत्वम्।।
तेषान्ह्यावयवधारायाः अनन्तत्वेमेरुसर्षपयोरपिसाम्यप्रसङ्गः।।अतःक्वचिद्धिआमोवाच्यः।। यत्रविश्रामस्तस्यानित्यत्वे असमवे

।।साचत्रिधाभवेद्देहमिन्द्रियंविषयस्तथा।।३८।। योनिजादिभवेद्देहमिन्द्रियंघ्राणलक्षणम्।।

तकार्योत्पत्तिप्रसङ्गात्तस्यनित्यत्वम्।।परममहत्परिमाणतारतम्यस्यगगनादौविश्रान्तत्वमिवअणुपरिमाणतारतम्यस्यापिक्वचि
त् विश्रान्तत्वमस्तीतितस्यपरमाणुत्वसिद्धिः।। नचत्र्यसरेणावेवविश्रामोस्त्विति वाच्यम्।।त्र्यसरेणुःसावयवः चाक्षुषद्रव्यत्वात्
घटवदित्यनुमानेनतदवयवसिद्धौत्र्यसरेणोरवयवाःसावयवाः महदारंभकत्वाद्धित्यर्थः।।कपालवदित्यनुमानेनतदवयवसि
द्धिः।।नचैदमप्रयोजकम्।। अपकृष्टमहत्त्वंप्रतिअनेकद्रव्यत्वस्यप्रयोजकत्वात्।। नचैवंक्रमेणतदव[illegible]धारापिसिद्धेदितिवा
च्यम्।।अनवस्थाभयेनतदसिद्धेरिति।। सेति।।साकार्यरूपापृथिवीत्रिविधा।। शरीरेन्द्रियविषयभेदादित्यर्थः।तत्रदेहमुदाहरति।।
योनिजादीति।।योनिजमयोनिजंचेत्यर्थः।। योनिजमपिजरायुजमण्डजञ्चेत्यर्थः।जरायुजंमानुषादीनाम्।। अण्डजंसर्पादीनाम्।।

अयोनिजंस्वेदजोद्भिज्जादिकम्॥स्वेदजाः क्रिमिदंशाद्याः॥उद्भिदस्तरुगुल्माद्याः॥नारकीणांशरीरमप्ययोनिजम्॥नचमानुषादिशरीराणांपार्थिवत्वेकिंमानमितिवाच्यम्॥गन्धादिमत्वस्यैवप्रमाणत्वात्॥नचक्लेदोष्मादेरुपलंभादाप्यत्वादिकमपिस्यादितिवाच्यम्॥तथासतिजलत्वपृथिवीत्वादिनासाङ्कर्यप्रसङ्गात्॥नचतर्हिजलत्वादिकमेवास्तुनतुपार्थिवत्वादिकमितिवाच्यम्॥क्लेदादीनांविनाशेपिशरीरत्वेनप्रत्यभिज्ञानात्॥गन्धाद्युपलब्धेश्चपृथिवीत्वसिद्धेः॥एतेनपार्थिवादिशरीरेजलादीनांनिमित्तत्वमात्रंबोध्यम्॥शरीरत्वंनजातिः॥पृथिवीत्वादिनासाङ्कर्यात्॥किन्तुचेष्टाश्रयत्वम्॥वृक्षादीनामपिचेष्टासत्वान्नाव्याप्तिः॥नचवृक्षादेःशरीरत्वेकिंमानमितिवाच्यम्॥आध्यात्मिकवायुसम्बन्धस्यप्रमाणत्वात्॥तत्रैवकिंमानमितिचेत्॥भग्नक्षतसंरोहणादिनातदनुमानात्॥यदिहस्तादौशरीरव्यवहारोनभवतितदाभन्त्यावयवित्वेनविशेषणीयम्॥नचयत्रशरीरेचेष्टानजातातत्राव्याप्तिरितिवाच्यम्॥तादृशेप्रमाणाभावात्॥अथवाचेष्टावदन्त्यावयवित्वमात्रवृत्तिद्रव्यत्वव्याप्यजातिमत्वम्॥अन्त्यावयवित्वमात्रवृत्तिचेष्टावद्वृत्तिद्रव्यत्वव्याप्यजातिमत्ववा॥मानुषत्वंचैत्रत्वादिजातिमादायलक्षणसमन्वयः॥नचनृसिंहशरीरेकथमेतल्लक्षणसमन्वयः तत्रनृसिंहत्वस्यैकव्यक्तिवृत्तितयाजातित्वाभावात्॥जलीयतैजसशरीरवृत्तितयादेवत्वस्यापिजातित्वाभावादितिवाच्यम्॥कल्पभेदेननृसिंहशरीरस्यनानात्वेननृसिंहत्वजात्यालक्षणसमन्वयात्॥इंद्रियमिति॥घ्राणेन्द्रियंपार्थिवमित्यर्थः॥पार्थिवत्वंकथमितिचेदित्थम्॥घ्राणेन्द्रियंपार्थिवम्॥रूपादिषुपञ्चसुमध्येगन्धस्यैवाभिव्यञ्जकत्वात्॥कुङ्कुमगन्धाभिव्यञ्जकघृतादिवत्॥नचदृष्टान्तेरूपादिव्यञ्जकत्वादसिद्धिरितिवाच्यम्॥परकीयरूपाव्यञ्जकत्वस्यतदर्थत्वात्॥नचनवशरावगन्धाभिव्यञ्जकजलेनानैकान्त्यमितिवाच्यम्॥तस्यसक्तुरसाभिव्यंजकत्वात्॥यद्वापरकीयेतिनदेयम्॥वायू

पनीतसंस्कारभिभागस्यदृष्टान्तत्वसम्भवात्॥ नचघ्राणेन्द्रियसन्निकर्षस्यगन्धव्यञ्जकत्वात्तत्रव्यभिचारइतिवाच्यम्॥ द्रव्यत्वेसतीति विशेषणात्॥ विषयइति॥ उपभोगसाधनंविषयः॥ सर्वमेवहिकार्यजातंअदृष्टाधीनम्॥ यच्चकार्यंयददृष्टाधीनन्तत्तूदुपभोगंसाक्षात्परम्परयावाजनयत्येव॥ नहिबीजप्रयोजनाभ्यांविनाकस्यचिदुत्पत्तिरस्ति॥ तेनह्यणुकादिकंब्रह्माण्डान्तंसर्वमेवविषयोभवति॥ शरीरेन्द्रिययोर्विषयत्वेपिप्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः॥ जलंनिरूपयति॥ वर्णेति॥ स्नेहसमवायिकारणतावच्छेदकतयाजलत्वंजातिःसिद्ध्यति॥ यद्यपिस्नेहत्वंनित्यानित्यवृत्तितयानकार्यतावच्छेदकंतथापिजन्यस्नेहत्वंतथाबोध्यम्॥ अथपरमाणोर्जलत्वंनस्यात्॥ तत्रजन्यस्नेहाभावात्॥ तस्यचनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावइतिनियमादिति

विषयोह्यणुकादिस्तब्रह्माण्डान्तउदाहृतः॥३९॥ वर्णःशुक्लोरसस्पर्शौजलेमधुरशीतलौ॥७॥

चेन्न॥ जन्यस्नेहजनकतावच्छेदकतयाजन्यजलत्वजानेःसिद्धौतदवच्छिन्नजनकतावच्छेदकतयाजलत्वजातिसिद्धेः॥ शुक्लरूपमेवजलस्येतिदर्शयितुमुक्तंवर्णः शुक्लइति॥ ननुशुक्लरूपवत्त्वंलक्षणम्॥ अथवानैमित्तिकद्रवत्ववदवृत्तिशुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्॥ अभास्वरशुक्लेतररूपसमानाधिकरणरूपवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वंवातदर्थः॥ रसस्यशौक्लिति॥ जलस्यमधुरएवरसः॥ शीतएवस्पर्शः॥ तिक्तवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंतदर्थः॥ ननुशुक्लरूपमेवेतिकुतः। कालिन्दीजलादौनीलिमोपलब्धेरितिचेन्न॥ नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जलेनीलरूपासम्भवात्॥ कालिन्दीजलेनीलत्वप्रतीतिस्तुआश्रयोपाधिकीभ्रान्तैव॥ अतएववियतिविस्पष्टेधवलिमोपलब्धेः। अथजलेमाधुर्यंकिंमा

नम्॥ नहि तत्र प्रत्यक्षेणकोपि रसस्तत्रानुभूयते॥ नचनारिकेलजलादौ माधुर्यमुपलभ्यत इतिवाच्यम्॥ तस्यात्र योपाधिकत्वात्॥ अन्यथाजम्बीरकरवीररसादौ आम्लाद्युपलब्धेरम्लत्वादिकमपिस्यादितिवाच्यम्॥ हरीतक्यादिभक्षणस्यजलरसव्यञ्जकत्वात्॥ नचहरीतक्यामेवजलोष्मसंयोगाद्रसान्तरोत्पत्तिरितिवाच्यम्॥ कल्पनागौरवात्॥ पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्चजलेनाम्लादिकम्॥ जम्बीररसादौत्वाश्रयोपाधिकीतथाप्रतीतिः॥ एवंजन्यशीतस्पर्शजनकतावच्छेदकंजलत्वंजन्यजलत्वंवाबोध्यम्॥ घृष्टचन्दनादौशैत्योपलब्धिश्चन्दनान्तरवर्त्तिशीततरसलिलस्य॥ तेजःसंयोगाज्जलेउष्मत्वप्रतीतिरौपाधिकीस्फुटैव॥ तत्रपाकासम्भवात्॥ स्नेहइति॥ घृतादावपितदन्तर्वर्तीजलस्यैवस्नेहः॥ जलस्यैवस्नेहसमवायिकारणत्वात्॥ तेनजले

स्नेहस्तत्रद्रवत्वन्तुसांसिद्धिकमुदाहृतं॥४०॥ नित्यतादिप्रथमवत्किन्तुदेहमयोनिजम्॥ इन्द्रियंरसनंसिन्धुर्हिमादिर्विषयोमतः॥४१॥

एवस्नेहइतिमन्तव्यम्॥ द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वंजातिविशेषः प्रत्यक्षसिद्धः॥ तदवच्छिन्नजनकतावच्छेदकमपितदेवेतिभावः। तैलादावपिजलस्यैवद्रवत्वम्॥ स्नेहप्रकर्षेणदहनानुकूल्यमितिवक्ष्यति॥ नित्यतादिप्रथमवत्। पृथिव्यादेरित्यर्थः। तथाहि॥ जलंद्विविधम्। नित्यमनित्यञ्च। परमाणुरूपंनित्यम्। तदन्यदनित्यम्। अवयवसमवेतम्। अनित्यमपित्रिविधम्। शरीरेन्द्रियविषयभेदात्। पृथिवीतोयोविशेषस्तयाह॥ किन्तुदेहमयोनिजम्। अयोनिजमेवेत्यर्थः। जलीयंशरीरमयोनिजंवरुणलोकेपसिद्धम्॥ इंद्रियरसनमिति॥ रसनेन्द्रियंजलीयमित्यर्थः। तथाहि। रसनंजलीयंगन्धाद्यव्यञ्जकत्वेसतिरसव्यञ्जकत्वात्। सक्तुरसाभिव्यञ्जकोदकवत्। रसनमसन्निकर्षेव्यभिचारवारणायद्रव्यत्वदेयम्॥ विषयंदर्शयति॥ सिन्धुर्हिमादिरिति॥ सिन्धुः समुद्रः॥ हिमं तुषारः॥ आदिपदात्सरि

त्कासारकरकादिःसर्वोप्यर्थोग्राह्यः॥ नचहिमकरकयोः कठिणत्वात्पार्थिवत्वमितिवाच्यम्॥ ऊष्मणाविलीनयोस्तयोर्जलत्वं
स्यप्रत्यक्षसिद्धत्वात्॥ यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतद्द्रव्यंतदुपादानोपादेयमितिव्याप्तेः॥ जलोपादानोपादेयत्वमिद्धेः॥ अदृष्टवि
शेषेणद्रवत्वप्रतिरोधात्॥ करकायांकाठिण्यप्रत्ययस्यभ्रान्तित्वात्॥ तेजोनिरूपयति॥ स्पर्शउष्णइत्यादिना॥ उष्णत्वंस्पर्श
निष्ठोजातिविशेषःप्रत्यक्षसिद्धः॥ इत्यञ्जनन्योष्णस्पर्शसमवायिकारणतावच्छेदकंतेजस्त्वंजातिविशेषः॥ तस्यपरमाणु
वृत्तित्वन्तुजलत्वस्येवानुसन्धेयम्॥ नचोष्णस्पर्शवत्त्वंचन्द्रकिरणादावव्याप्तमितिवाच्यम्॥ तत्राप्युष्णस्पर्शसत्वात्॥ कि
न्तुतदन्तःपातिजलस्पर्शेनाभिभवात्तद्ग्रहः॥ एवंरत्नकिरणादौचपार्थिवस्पर्शेनाभिभवाच्चक्षुरादौचानुद्भूतत्वात्तद्ग्रहः॥ रूप

॥स्पर्शउष्णस्तेजसस्तुस्याद्रूपंशुक्लभास्वरं॥नैमित्तिकंद्रवत्वन्तु---नित्यतादिचपूर्ववत्॥४२

मित्यादि॥ वैश्वानरेमरकतकिरणादौचपार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः॥ ननुतद्ग्रहेधर्मिणोपिचाक्षुषत्वंनस्यादितिचे
न्न॥ अन्यदीयरूपेणापिधर्मिणोपिग्रहसंभवात्॥ शङ्खस्येवपित्तपीतिमा॥ वह्नेस्तुशुक्लरूपेणाभिभूतम्। किंनुतदीयंशुक्लत्व
मभिभूतमित्यन्ये॥ नैमित्तिकमिति॥ सुवर्णादिरूपेतेजसितत्सत्वात्॥ नचनैमित्तिकद्रवत्वंवह्नौलक्षणंदहनादावव्याप्तं---घृतादाव
तिव्याप्तंचेतिवाच्यम्॥ पृथिव्यवृत्तिनैमित्तिकद्रवत्वंवहृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥ पूर्ववदिति॥ जलस्ये
वेत्यर्थः॥ तथाहि। तेजोद्विविधम्॥ नित्यमनित्यञ्च॥ परमाणुरूपंनित्यम्। तदन्यदनित्यमवयविच॥ तच्चत्रेधा॥ शरीरेन्द्रियविषयभे

तच्चसूर्यलोकादौप्रसिद्धम्॥अत्रयो विशेषस्तमाह॥ इन्द्रियमिति॥चक्षुस्तैजसंपरकीयस्पर्शाद्यव्यञ्जकत्वेसतिपरकीयरूपव्यञ्जकत्वात्॥प्रदीपवत्॥प्रदीपस्यस्वीयस्पर्शव्यञ्जकत्वादाद्यपरकीयेति॥मण्यादेःस्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणायद्वितीयंपरकीयेति॥अथवाप्रभायादृष्टान्तत्वसम्भवादाद्यंपरकीयेतिनदेयम्॥चक्षुःसन्निकर्षेव्यभिचारवारणायद्रव्यत्वंदेयम्॥विषयंदर्शयति॥वह्नीति॥ननुसुवर्णस्यतैजसत्वेकिंमानमितिचेन्न॥सुवर्णंतैजसंअसतिप्रतिबन्धकेअत्यन्तानलसंयोगेद्रव्यंनुच्छिद्यमानद्रवत्वात्॥यन्नैवंतन्नैवम्॥यथापृथिवी॥नचाप्रयोजकम्॥पृथिवीद्रवत्वस्यजलद्रवत्वस्यचाग्निसंयोगनाश्यत्वात्॥ननुपीतिमगुरुत्वाश्रयस्यपार्थिवस्यापितदानींद्रुतत्वात्तेनव्यभिचारइतिचेन्न॥जलमध्यस्थमपीक्षोदवत्तस्याद्रवत्वा

इन्द्रियंनयनंवह्निस्वर्णादिर्विषयोमतः॥अपाकजानुष्णाशीतस्पर्शस्तुपवनेमतः॥४३॥तिर्यग्गमनवानेषज्ञेयःस्पर्शादिलिंगकः

त्॥अपरेतुपीतिमाश्रयस्यअत्यन्तानलसंयोगेपिरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकंविनातीयद्रवत्वंकल्प्यते॥तथाहि॥अग्निसंयोगीपीतिमगुरुत्वाश्रयः॥विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः॥अत्यन्तानलसंयोगेपिपूर्वरूपविजातीयरूपानधिकरणपार्थिवत्वात्॥जलमध्यस्थपीतपटवत्॥तस्यपृथिवीजलभिन्नस्यतेजस्त्वंनियमात्॥वायुंनिरूपयति॥अपाकजइति॥अनुष्णाशीतस्पर्शस्यपृथिव्यामपिसत्वाद्तउक्तमपाकजइति॥अपाकजस्पर्शस्यजलादावपिसत्वाद्तउक्तमनुष्णाशीतइति॥एतेनवायवीयोविजातीयस्पर्शोदर्शितः॥तज्जनकतावच्छेदकंवायुत्वमितिभावः॥एषःवायुःस्पर्शादिलिङ्गकः॥वायुर्हिस्पर्शशब्दधृतिकम्पेरनुमीयते॥विजातीयस्पर्शेनविलक्षणशब्देनतृणादीनांधृत्याशाखादीनांकम्पनेनवायोरनुमानात्॥ ॥

यथाचवायुर्नप्रत्यक्ष स्तथाग्रेवक्ष्यते॥पूर्ववदिति॥ वायुर्द्विविधः नित्योनित्यश्च॥परमाणुरूपोनित्यः॥तदन्योऽनित्यः॥समवेतश्च॥सोपि त्रिविधः॥शरीरेन्द्रियविषयभेदात्॥तत्रशरीरमयोनिजंपिशाचादीनाम्॥परन्तुजलीयतेजसवायवीयशरीराणांपार्थिवभागोपष्टंभकत्वादुपभोगक्षमत्वम्॥जलादीनांप्राधान्याज्जलीयत्वादिकमिति॥अत्रयोविशेषस्तमाह॥देहव्यापीति॥ ॥ ॥शरीरव्यापकंस्पर्शे ग्राहकमिन्द्रियंत्वक्॥नच्चवायवीयम्॥रूपादिषुमध्येस्पर्शस्यैवाभिव्यञ्जकत्वात्॥अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्॥विषयंदर्शयति॥प्राणादिस्त्विति॥ यद्यपिअनित्योवायुश्चतुर्विधस्तस्यचतुर्विधोप्राणादिरित्यक्तमाकरे तथाप्यत्र संक्षेपात्त्रैविध्यमुक्तम्॥प्राणस्त्वेकएवत्वदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियावशाच्चनानासं

पूर्ववन्नित्यताद्युक्तंदेहव्यापित्वगिन्द्रियम्॥४४॥प्राणादिस्तुमहावायुपर्यंतोविषयोमतः॥आकाशस्यतुविज्ञेयःशब्दोवैशेषिको गुणः॥४५

न्नालभतइति॥आकाशंलक्षयति॥आकाशस्येति॥आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकंनजातिः॥किन्तुआकाशत्वंशब्दाश्रयत्ववैशेषिकइतिकथनन्तुविशेषगुणान्तरव्यवच्छेदाय॥एतेनप्रमाणमपिदर्शितम्॥तथाहि॥शब्दोगुणः॥चक्षुर्ग्रहणायोग्यत्वेसतिबहिरिन्द्रियग्राह्यजातिमत्वात् स्पर्शवत्॥शब्दोद्रव्यसमवेतःगुणत्वादित्यनुमानेनशब्दस्यद्रव्यसमवेतत्वसिद्धेः॥शब्दोनस्पर्शवद्विशेषगुणः॥ अग्निसंयोगासमवायिकारणकत्वाभावेसतिअकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत्॥पाकजरूपादौव्यभिचारवारणायसत्यन्तम्॥पटरूपादौव्यभिचारवारणायाकारणगुणपूर्वकेति॥जलरूपपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति॥नदिक्कालमनोगुणः॥विशेषगुणत्वात्॥रूपवत्॥नात्मविशेषगुणः॥बहिरिन्द्रिययोग्यत्वात्॥ रूपवत्॥ इत्थं

च शब्दाधिकरणंनवमद्रव्यंगगननामकंसिध्यति॥नचवाच्यवयवेषुसूक्ष्मशब्दक्रमेणवायौकारणगुणपूर्वकःशब्दउत्पद्यता
मितिवाच्यम्॥अयावद्द्रव्यभावित्वेनवायौविशेषगुणत्वाभावात्॥तत्रशरीरस्यविषयस्यचाभावात्तु॥इन्द्रियंदर्शयति॥इन्द्रि
यमिति॥नन्वाकाशंलाघवादेकंसिद्धंश्रोत्रंपुरुषभेदाद्भिन्नंकथमाकाशंस्यादतआह॥एकःसन्नपीति॥॥आकाशःएकःसन्न
प्युपाधेःकर्णशष्कुल्यादेर्भेदाद्भिन्नंश्रोत्रात्मकंभवतीत्यर्थः॥कालंनिरूपयति॥जन्यानामिति॥तत्रप्रमाणंदर्शयितुमाह॥ज
गतामाश्रयइति॥तथाहि॥इहानींघटइतिप्रतीतिःसूर्यपरिस्पन्दादिकंयदाविषयीकरोति॥तदासूर्यपरिस्पंदादिनाघटादेःसं
बन्धोवाच्यः॥सचसंयोगादिर्नसम्भवतीतिकालएवसंबन्धघटकःकल्प्यते॥इत्थञ्चतदाश्रयत्वमेवसम्यक्॥प्रमाणान्तरंवदति

इन्द्रियंचभवेच्छ्रोत्रमेकःसन्नप्युपाधितः॥जन्यानांजनकःकालोजगतामाश्रयोमतः॥४६॥परापरत्वधीहेतुःक्षणादिःस्यादुपा
धितः॥दूरान्तिकादिधीहेतुरेकानित्यादिगुच्यते॥४७॥

॥परापरत्वेति॥परापरत्वादिबुद्धेरसाधारणंनिमित्तंकालएव॥परापर
त्वयोरसमवायिकारणसंयोगाश्रयोलाघवादतिरिक्तःकल्प्यतइतिभावः॥नन्वेकस्यकालस्यसिद्धौक्षणदिनमासवर्षादिसमयभे
दोनस्यादतआह॥क्षणादिरिति॥कालस्त्वेकोप्युपाधिभेदात्क्षणादिव्यवहारविषयइत्यर्थः॥उपाधिस्तुस्वजन्यविभागप्रागभावावच्छि
न्नकर्म॥पूर्वसंयोगावच्छिन्नविभागोवा॥पूर्वसंयोगनाशावच्छिन्नउत्तरसंयोगप्रागभावोवा॥उत्तरसंयोगावच्छिन्नंकर्मवा॥नचउत्तर
संयोगानन्तरंक्षणव्यवहारोनस्यादितिवाच्यम्॥कर्मान्तरसत्त्वात्॥महाप्रलयेक्षणादिव्यवहारोयद्यस्तितदाअनायत्त्याध्वंसेनैवोपपा
दनीयेति॥दिनादिव्यवहारस्तुतत्क्षणकूटैरिति॥दिशंनिरूपयति॥दूरान्तिकेति॥दूरत्वमन्तिकत्वंचदेशिकपरत्वमपरत्वंचबोध्यम्॥

तद्धेरसाधारणंनिमित्तंहिग्रहेष्वपि।दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतयादिक्सिध्यतीतिभावः४५
ननुएकैवदिग्यदितःशाखाद्यादित्यव्यवहारःकथमुपपद्यतामित्यतआह॥उपाधीति॥यदायसुरपर्वतस्योदयगिरिसन्नि
हितादिक्तदातत्सुरपर्वतस्यसाखाची॥उदयगिरिव्यवहितादिग्भवतीची॥एवंतेसुरपर्वतस्यसुमेरुसंनिहितादिगुदीची।तद्व्य
हितात्ववाची॥सर्वेषामेववर्षाणांमेरुरुत्तरतःस्थितइतिनियमात्॥आत्मानंनिरूपयति॥आत्मेति॥आत्मात्वंजातिः
सुखदुःखसमवायिकारणतावच्छेदकतयासिध्यति॥ईश्वरेपिसाजातिरस्तिअदृष्टरूपकारणाभावान्नसुखदुःखाद्यसंभवः॥
नित्यस्यस्वरूपयोग्यत्वस्यफलावश्यंभावादितिनियमस्याप्रयोजकत्वात्॥परंतु॥ईश्वरेसाजातिर्नास्त्येव॥मानाभावात्॥
नचदृश्यमद्रव्यत्वापत्तिः॥ज्ञानत्वेनविभजनादित्याहुः॥इंद्रियाणीति॥अधिष्ठातेंद्रियाणांशरीरस्यचपरस्परयाचैतन्य
उपाधिभेदाकापिप्राच्यादिव्यपदेशभाक्॥आत्मेंद्रियाद्यधिष्ठातृकारणंहिसकर्तृकं॥४६॥शरीरस्यनचैतन्यं
सम्यादकः॥यद्यप्यात्मनिअहंज्ञानेअहंसुखीत्यादिप्रत्यक्षंविषयत्वमस्यवतथापिविप्रतिपन्नंप्रतिप्रथमतएवशरीरादि
भिन्नत्वप्रतीतिर्गोचरइतिप्रतिपादयितुंनशक्यतइतिअतःप्रमाणांतरदर्शयति॥करणंहीति॥नारयादीनांछिदाकरणा
नांकर्तरिमंतरेणफलानुपधानंदृष्टम्॥एवंचक्षुरादीनांज्ञानकरणानामपिफलोपधानंकर्तरिमंतरेणनोपपद्यतइत्य
तिरिक्तःकर्ताकल्प्यते४८ननुशरीरस्यैवकर्तृत्वमस्तुतआह॥शरीरस्येति॥ननुचैतन्यंज्ञानादिकमेव॥मुक्तात्मा
नांक्षणमात्रंमृतशरीराणांतद्भावेपिकाक्षतिः॥प्राणाभावेनज्ञानाभावस्यसिद्धेरितिचेन्न॥शरीरस्यचै

मृतेष्वभिचारतः॥

तन्येवास्येविलोकितस्यस्थिरेस्मरणंनस्यात् शरीराणामवयवोपचयापचयेस्थ हविनाशशालित्वात्॥ नचपूर्वशरीरेसंस्कारेणद्वितीयशरीरेसंस्कारउपयतद्वतिवाच्यम्॥ अनंतसंस्कारकल्पनेगौरवात्॥ एवंशरीरस्यचैतन्येवारूढस्यतुनपानोदोषप्रवृत्तिर्नस्यात्॥ इष्ट॥ यनतज्ज्ञानस्यतेहेतुत्वा॥ तदानीमिष्टसाधनत्वानुभावकाभावात्॥ १२॥
मनेतेतुजन्मांतरानुभूतेष्टसाधनत्वस्यतदानींस्मरणादेवप्रवृत्तिः॥ नचजन्मांतरानुभूतमन्यदपिस्मर्यतामितिवाच्यं॥ उद्बोधकाभावात्॥ अत्रत्वनायंजीवनादृष्टमेवोद्बोधकंकल्प्यते॥ इयंचसंसारस्यानादितयाऽमुलोप्यनादित्वसिद्धौअनादिभावस्यनाशासंभवान्नियतंसंभवतीतिबोध्यम्॥ नुचक्षुरादीनामेवज्ञानादौकरणत्वंकुतइत्याह॥ विरोधेबाधकाभावादत आह॥ तथात्वमिति॥ तथात्वंचैतन्यमित्यर्थः॥ उपपत्तेरिति॥ तथात्वेसतीत्यर्थः॥ चक्षुरादीनामेव॥ कथमिति॥ पू॰

तथात्वमिंद्रियाणांचेदुपघातेकथंस्मृतिः॥ ४९॥ मनोपिनतथाज्ञानायनध्यक्ष्यंतदाभवेत्॥

र्वंचक्षुषासाक्षात्कृतानांचक्षुरभावेस्मरणंनस्यात्॥ अनुभवितुरभावात्॥ अन्यानुभूतस्यान्येनस्मरणासंभवात्॥ अनुभवस्मरणयोःसामानाधिकरण्येनकार्यकारणभावादिभावः॥ ४९॥ ननुचक्षुरादीनांचैतन्यंमास्तुमनसस्तुनित्यस्यचैतन्यंस्यादतआह॥ मनोपीति॥ नतथानुचैतन्यं॥ ज्ञानादीति॥ मनसोणुत्वात्सूक्ष्मत्वाद्धेतोस्तत्वात्॥ मनसिज्ञानसुखादिसंवेदनसंक्षानुपपत्तेरित्यर्थः॥ यथाचमनसोणुत्वंतथाग्रेवक्ष्यते॥ नन्वस्तुविज्ञानमेवात्मातस्यस्वतःप्रकाशत्वाच्चैतन्यमस्त्वित्यत आह॥ ज्ञानसुखादिकंतुतस्यैवाकारविशेषः॥ तस्यापिभावत्वादेवक्षणिकत्वंपूर्वपूर्वविज्ञानस्योत्तरोत्तरज्ञानेहेतुत्वात्॥ सुषुप्तावपिआत्मैवविज्ञानधारानिराबाधैवा॥ मृगमदवासनायाःवस्त्रेवपूर्वपूर्वविज्ञानजनितसंस्कारेणोत्तरोत्तरउत्तरोत्तरविज्ञानेसंक्रांतत्वानुपपत्तेःस्मरणादितिचेन्न॥ तस्यजगद्विषयत्वेसार्वज्ञता ॥१३॥

नचद्वित्वमपि नश्यतीतिवाच्यम्॥ तवनिर्धर्मिके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तदितिवद्वित्वाभावेपियुक्तं सकोतावितिसुवच
त्वात्॥ मिथ्यात्वाभावोऽधिकरणात्मकस्तत्रसत्यत्वमितिचेत्॥ एकत्वाभावोव्यक्तिद्वयात्कोद्वित्वमयुच्यतांम्॥ प्रत्येकमेकत्वेपिद्वयि
वीजलयोर्नगंधइतिवदुभयंनैकमित्यस्य सर्वज्ञनासिद्धत्वात्॥ योपितदानींअभेदप्रतिपादकआगमःसोपिनिर्दुःखत्वादिनासा
म्यंप्रतिपादयति॥ संपदाधिक्येपुरोहितोयंराजासंवृत्तइतिवत्॥ अतएवनिरंजनःपरमंसाम्यमुपैतीतिश्रूयते॥ ईश्वरोपि नज्ञानसु
खात्मा॥ किंतुज्ञानाद्याश्रयः॥ नित्यंज्ञानमानंदंब्रह्मेत्यादौवि ज्ञानपदेनज्ञानाद्याश्रयएवोक्तः॥ यःसर्वज्ञइत्याद्यनुरोधात्॥ आनंदमि
त्यस्याप्यानंदवानित्यर्थः॥ आनंदोपिदुःखाभावेउपचर्यते॥ राद्यपगमेसुखीसंवृत्तोहमितिवत्॥ अस्तुवातस्मिन्नानंदोन
त्वसावानंदः॥ असुखमितिश्रुतेः॥ नविद्यतेसुखंयस्येतिकुतोनार्थइतिचेन्न॥ क्लिष्टकल्पनात्वात्॥ एकरणविरोधाच्च॥ आ
नंदमित्यत्र मत्वर्थीयाच्चप्रत्ययविरोधाच्चेतिसंक्षेपः॥ एतेनप्रकृतिः कर्त्रीपुरुषःपुष्करपलाशवन्निर्लेपः॥ किंतुचेतनः॥ का
र्यकारणयोरभेदात्कार्येनाशेसतिकार्यरूपतयातंनाशोनस्यादित्यकारणत्वम्॥ तस्यबुद्धिगतैचैतन्याभिमानान्यथानु
पपत्यातत्कल्पनम्॥ बुद्धिश्चप्रकृतेः परिणामः॥ सैवमहत्तत्वमंतःकरणमित्युच्यते॥ तत्सत्वासत्वाभ्यांपुरुषस्यसंसा
रापवर्गौ॥ तस्याएवेंद्रियव्रणालिकयापरिणतिर्ज्ञानरूपाघटादिनासंबंधः॥ पुरुषेकर्तृत्वाभिमानाबुद्धौचैतन्याभिमा
नश्चाभेदाग्रहात्॥ ममेदंकर्तव्यमितिमदंशः पुरुषोपरागः॥ बुद्धेःस्वच्छतयाचेतनप्रतिबिंबादनालिकः॥ दर्पणस्येवमुखो
परागः॥ इदमितिविषयोपरागः॥ इंद्रियव्रणालिकयापरिणतिर्भेदस्तनालिकः॥ निश्वासाभिहतदर्पणस्येवमलिनिमा

त्तिः। यत्किंचविषयत्वेविनिगमकाभावः।सुषुप्तावपिविषयावभासप्रसंगश्च।ज्ञानस्यस्वविषयत्वात्।तदीनोंनिरंचिसंततिरनुवर्त्तेतइतिचेन्नातस्याःप्रकाशतेप्रमाणाभावात्।अन्यथाघटादीनामपिविज्ञानत्वापत्तिः।नचेष्टापत्तिःविज्ञानव्यतिरिक्तस्यवस्तुभावादितिवाच्यं।घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्।आकारविशेषत्वायंविज्ञानस्येतिचेन्न।किमयमाकारोतिरिच्यतेविज्ञानात्तर्हिसमायातंविज्ञानव्यतिरिक्तेनातिरिच्यतेचेत्तर्हिसमूलंहालेवनेनीलाकारोपिपीताकारःस्यात्।स्वरूपतोविज्ञानस्याविशेषात्।अपोहरूपोनीलत्वादिर्विज्ञानधर्मइतिचेन्नानीलत्वादीनांविरुद्धानामेकस्मिन्समावेशात्।इतरथाविशेषावधारणस्येवदुरुपपादनत्वात्।नवावासानांसंक्रमस्संभवति।मातृपुत्रयोरपिवासनासंक्रमप्रसंगात्।नचोपादानोपादेयभावोनियामकइतिवाच्यं।वासनायाःसंक्रमात्।उत्तरस्मिन्नुत्पत्तिस्वसंक्रमइतिचेन्नातदुत्पादकाभावात्।चित्तामेचोत्पादकत्वेतदासंस्कारानंत्यप्रसंगः।क्षणिकविज्ञानेक्षतिशयविशेषःकल्प्यतइतिचेन्न।मानाभावात्।कल्पनागौरवाच्च॥

एतेनक्षणिकशरीरेष्वेवचैतन्यमपिप्रयुक्तं।गौरवात्।अतिशयेमानाभावाच्च।वीजादावपिसहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः।कुर्वद्रूपत्वाकल्पनात्।अस्तुतर्हिक्षणिकविज्ञानेगौरवान्नित्यविज्ञानमेवात्मा।अविनाशिवैरेयमात्मासत्यंज्ञानमानंदंब्रह्मेत्यादिश्रुतेश्चेति।चेन्नातस्यस्वविषयत्वेतत्संभवस्यादर्शितत्वात्।निर्विषयस्यज्ञानत्वेमानाभावात्।सविषयकत्वस्यानुभवात्।अतोज्ञानस्वभावोनित्यआत्मेतिस्थं।सत्यंज्ञानमानंदमितिब्रह्मपरंजीवपुनोपयुज्यतेज्ञानाज्ञानसुखेतरदुःखेतराभ्यांजीवानोपरस्परंभेदसिद्धेस्तुतरांमीश्वरभेदः।अन्यथाबंधमोक्षानुपपत्तेः।योपीश्वराभेदप्रतिपादकोवेदःसोपितद्भेदेनतदीयंप्रतिपादयन्नस्तीति।अभेदभावनयैवज्ञातव्यमितिचेदुच्यते।अतएवसर्ववेदान्तसमन्वयःसमर्पितइतिसूत्यते।नोचेदद्वैतायमज्ञाननिवृत्तावपिभेदोज्ञायतइत्यज्ञाभेदनित्यत्वेनाशायोगात्।भेदनाशोपिप्रत्यक्षेदुर्घटस्थास्यत्येव॥

कर्तव्यमितिव्यापारावेशः तेनांशत्रयवतीबुद्धिस्तत्परिणामेनज्ञानेनपुरुषस्यातात्त्विकः सम्बन्धः॥ दर्पणमलिनिम्नेवमुखस्योप
लब्धिरुच्यते॥ ज्ञानवत्करवदुःखेच्छाद्वेषप्रयत्नधर्माधर्माअपिबुद्धेरेव॥ कृतिसामानाधिकरण्येनप्रतीतेः॥ नचबुद्धिश्चेतना
परिणामित्वादितिमतमपास्तम्॥ कृत्यदृष्टभोगानामिवचैतन्यस्यापिसामानाधिकरण्यप्रतीतिः॥ तद्भिन्नेमानाभावात्त्वाचेतनो
हंकरोमीतिप्रतीतेः॥ चैतन्यांशेभ्रमइतिचेत्कृत्यंशेपिकिंनेष्यते॥ अन्यथाबुद्धेर्नित्यत्वेमोक्षाभावोअनित्यत्वेतत्पूर्वमसंसारा
पत्तिः॥ अचेतनायाःप्रकृतेःकार्यत्वात्बुद्धेरचैतन्यम्॥ कार्यकारणयोस्तादात्म्यादितिचेन्न॥ असिद्धेः॥ कर्त्तुर्जन्यत्वेमानाभा
वात्॥ वीतरागजन्मादर्शनाद्नादित्वम्॥ अनादिभावस्यनाशासम्भवान्नित्यत्वम्॥ तत्किंप्रकृत्यादिकल्पनेन॥ नचप्रकृतेः

धर्माधर्माश्रयोध्यक्षोविशेषगुणयोगतः॥५०॥प्रवृत्त्याद्यनुमेयोयंरथवत्त्येवसारथिः॥

क्रियमाणानिगुणैःकर्मभिर्वेशः॥ अहंकारविमूढात्माकर्त्ताहमितिमन्यतेइत्यनेनविरोधइतिवाच्यम्॥ प्रकृतेःअदृष्टस्यगुणैःअदृ
ष्टजन्यैरिच्छादिभिःकर्त्ताहंअहमेवेत्यस्यतदर्थत्वात्॥ तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयइत्यादिवेदताभगवताप्रकटीकृतो
यमर्थमुपरिष्टादाशयइतिसंक्षेपः॥ धर्माधर्माश्रयइति॥ आत्मेत्यनुषज्यते॥ शरीरस्यतदाश्रयत्वेदेहांतरकृतकर्मणोदेहांतरभो
गानुपपत्तेः॥ विशेषगुणयोगतइति॥ योग्यविशेषगुणस्यज्ञानसुखादेःसम्बन्धेनआत्मनःप्रत्यक्षंभवति॥ नत्वन्यथा॥ अहंजा
निअहंकरोमीत्यादिप्रतीतेः॥ प्रवृत्तीति॥ आत्मापरदेहादौप्रवृत्त्यादिनानुमीयते॥ प्रवृत्तिरत्रचेष्टा॥ ज्ञानेच्छाप्रयत्नादीनांदेहेअभा
वस्योक्तप्रायत्वाच्चेष्टायाःप्रयत्नसाध्यत्वाच्चेष्टयाप्रयत्नवानात्मानुमीयतइतिभावः॥ अत्रदृष्टान्तमाह॥ रथेति॥ यद्यपिरथक

तथापितेनकर्मणासारथिर्यथानुमीयतेतथाचेष्टात्मकेनकर्मणापरात्मानुमीयतइतिभावः॥अहंकारस्येति॥अहंकारोऽहमितिप्रत्ययस्तस्यआश्रयोविषयआत्मानशरीरादिरिति॥मनइति॥मनोभिन्नेन्द्रियप्रत्यक्षाविषयःमानसप्रत्यक्षविषयइत्यर्थः॥रूपाद्यभावेनइन्द्रियान्तरायोग्यत्वात्विभुरिति॥विभुत्वंपरममहत्वम्॥तच्चपूर्वमुक्तमपिस्पष्टार्थमुक्तम्॥बुद्ध्यादीति॥बुद्धिसुखदुःखेच्छादयश्चनुर्दशगुणाःपूर्वोक्ताज्ञातव्याः॥अत्रैवप्रसंगात्कतिपयबुद्धेःप्रपंचंदर्शयति॥बुद्धिस्त्विति॥हेविध्यव्युत्पादयति॥अनुभूतिरिति॥अनुभूतिश्चतुर्विधेति॥एतासांचतसृणांकरणानिचत्वारिप्रमाणानिप्रत्यक्षानुमानोपमानशब्दाःप्रमाणानिसूत्रोक्तानिवेदितव्यानि॥प्रत्यक्षमिति॥तत्रइन्द्रियजन्यज्ञानप्रत्यक्षम्॥यद्यपिमनोरूपेंद्रियजन्यसर्वमेवज्ञानंभवतितथापिमनोरूपेन्द्रियाणांयत्रज्ञानेकरणत्वंतत्प्रत्यक्षमितिविवक्षितम्॥ईश्वरप्रत्यक्षंतुनलक्ष्यम्॥इन्द्रियार्थसन्निकर्षोत्पन्नंज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकंप्रत्यक्षमितिसूत्रेणतथैवोक्तत्वात्॥अथवाज्ञानाकरणकंज्ञानंप्रत्यक्षम्॥इदंलक्षणंईश्वरप्रत्यक्षसाधारणम्॥अनुमितौव्याप्तिज्ञानस्यउपमितौसादृश्यज्ञानस्यशाब्दबोधेपदज्ञानस्यस्मरणेअनुभवस्यकरणत्वान्नतत्राति व्याप्तिः॥परामर्शजन्यंज्ञानमनुमितिः॥यद्यपिपरामर्शप्रत्यक्षादिकंपरामर्शजन्यंतथापिपरामर्शजन्यहेत्वविषयकंज्ञानमनुमितिः॥नचकादाचित्कहेतुविषयकानुमितावव्याप्तिः॥तादृशज्ञानवृत्तिअनुभवत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्॥अथवाव्याप्तिज्ञानक

अहंकारस्याश्रयोयंमनोमात्रस्यगोचरः॥५१॥विभुर्बुद्ध्यादिगुणवान्बुद्धिस्तूद्विविधामता॥अनुभूतिःस्मृतिश्चस्यादनुभूतिश्चतुर्विधा॥५२॥प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे॥

रणकंज्ञानमनुमितिः॥एवंसादृश्यज्ञानकरणकंज्ञानमुपमितिः॥पदज्ञानकरणकंज्ञानंशाब्दबोधः॥वस्तुतोयत्किंचिदनुमिति=
व्यक्तिमादायतद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम्॥एवंयत्किंचित्प्रत्यक्षादिकमादायतद्व्यक्तिवृत्तिअनुमित्यवृत्ति=
जातिमत्त्वंप्रत्यक्षत्वादिकंवाच्यमिति॥घ्राणजादीति॥घ्राणजंरासनंचाक्षुषंस्पार्शनंश्रोत्रंमानसमितिषड्विधंप्रत्यक्षम्॥
नचेश्वरप्रत्यक्षस्याविभजनात्न्यूनत्वम्॥जन्यप्रत्यक्षस्यैवनिरूपणीयत्वात्॥उक्तसूत्रानुसारात्॥घ्राणस्यगोचरइति
॥घ्राणग्राह्यइत्यर्थः॥गन्धत्वादिरिति॥आदिपदात्सुरभित्वासुरभित्वादिपरिग्रहः॥गन्धस्यप्रत्यक्षत्वात्तद्वृत्तिजातिरपिप्रत्य

घ्राणजादिप्रभेदेनप्रत्यक्षंषड्विधंमतम्॥५३॥घ्राणस्यगोचरोगन्धोगन्धत्वादिरपिस्मृतः॥तथारसोरसज्ञायास्तथाशब्दोपि
चश्रुतेः॥५४॥उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वन्तिपृथक्कसंख्ये॥विभागसंयोगपरापरत्वस्नेहद्रवत्वंपरिमाणयुक्त
म्॥५५॥क्रियाजातियोग्यवृत्तिःसमवायश्चतादृशः॥गृह्णातिचक्षुःसम्बन्धादालोकोद्भूतरूपयोः॥५६॥उद्भूतस्प
र्शवद्द्रव्यंगोचरःसोपिचत्वचः॥ क्षा॥गन्धाश्रयग्रहणेतुघ्राणस्यासामर्थ्यमितिबोध्यम्॥तथारसइति॥रसत्वादिसहितइत्य
र्थः॥तथाशब्दत्वादिसहितः॥गन्धोरसश्चोद्भूतोबोध्यः॥उद्भूतरूपमिति॥ग्रीष्मोष्मादौअनुद्भूतंरूपमितिनतत्रत्यक्षम्॥नद्वन्ति
उद्भूतरूपवन्ति॥योग्येति॥पृथक्त्वादिकमपियोग्यव्यक्तिवृत्तिबोध्यम्॥तादृशंयोग्यव्यक्तिवृत्तिरित्यर्थः॥चक्षुर्योग्यत्वमेवकथ
तदाह॥गृह्णातीति॥आलोकसंयोगोद्भूतरूपञ्चचाक्षुषप्रत्यक्षेकारणम्॥तत्रद्रव्यचाक्षुषंप्रतितयोः स्वाश्रयसमवायसम्बन्धेन
कारणत्वम्॥द्रव्यसमवेतरूपादिप्रत्यक्षेस्वाश्रयसमवायेन।द्रव्यसमवेतसमवेतरूपत्वादेःप्रत्यक्षेस्वाश्रयसमवायसंबन्धे

॥सोपिउद्भूतस्पर्शोपिस्पर्शत्वादिसहितः॥ रूपान्यदिति॥रूपरूपत्वादिभिन्नंयच्चक्षुषोयोग्यंतत्त्वगिंद्रिय स्यापिग्राह्यम्॥तथाचपृथ क्त्वसङ्ख्यादयोयेचक्षुर्ग्राह्यागुणाउक्ताः एवंक्रियाजानतोयोग्यव्यक्तिवृत्तयश्चत्वचोग्राह्याइति॥अत्रापित्वगिन्द्रियजन्येपिद्रव्य प्रत्यक्षेरूपंकारणमिति॥तथाचबहिरिन्द्रियजन्यद्रव्यप्रत्यक्षेरूपंकारणमिति॥नवीनास्तुबहिर्द्रव्यप्रत्यक्षेनरूपंकारणं प्रमाणा भावात्॥किन्तुचाक्षुषप्रत्यक्षेरूपंस्पार्शनप्रत्यक्षेस्पर्शः कारणंअन्वयव्यतिरेकात्॥बहिर्द्रव्यप्रत्यक्षमात्रेकिंकारणमितिचेत् ॥नकिंचित्॥आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वंवाप्रयोजकमस्तु॥रूपस्यकारणत्वेलाघवमितिचेत्॥वायोस्त्वगिन्द्रियेण ग्रहणप्रसङ्गेनत्॥इष्टापत्तिरितिचेत्॥स्पर्शएवलाघवात्कारणमस्तु॥प्रभायाअप्रत्यक्षेत्विष्टापत्तिरेवकिंनस्यात्॥तस्मात्प्रभांपश्य

रूपान्यच्चक्षुषोयोग्यंरूपमत्रापिकारणम्५७॥द्रव्याध्यक्षेत्वचोयोगोमनसाज्ञानकारणम्॥

मीतिवत्वायुंस्पृशामीतिप्रत्ययस्यसत्वात्वायोरपिप्रत्यक्षंभवत्येव॥बहिर्द्रव्यप्रत्यक्षमात्रेतुनरूपस्यनवास्पर्शस्यहेतुत्वम्॥ वायुप्रभयोरेकत्वगृह्यतएव॥क्वचिद्दित्वादिकमपि॥क्वचित्संख्यापरिमाणाद्यग्रहोदोषादित्याहुः॥त्वचोयोगइति॥त्वङ्मनः संयोगोज्ञानसामान्यकारणमित्यर्थः॥किंतत्रप्रमाणम्॥सुषुप्तिकालेत्वचंत्यक्त्वापुरीततिवर्त्तमानेनमनसाज्ञानाजननमिति॥ ननुसुषुप्तिकालेकिंज्ञानंभविष्यति॥अनुभवस्मरणंवानाद्यः॥अनुभवसामग्र्यभावात्॥तथाहि॥चक्षुरादिनामनःसंयोग स्यहेतुत्वान्नदभावादेवनचाक्षुषादिप्रत्यक्षम्॥ज्ञानादेरभावादेवनमानसंप्रत्यक्षम्॥ज्ञानाद्यभावेचात्मनोपिनप्रत्यक्षम्॥व्याप्ति ज्ञानाभावादेवनानुमितिः॥सादृश्यज्ञानाभावान्नोपमितिः॥पदज्ञानाभावान्नशाब्दबोधः॥इत्यनुभवसामग्र्यभावान्नानुभवः॥

उद्बोधकाभावाच्चनस्मरणम्।नैवम्।सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्चप्रत्यक्षत्वप्रसङ्गात्॥तदतीन्द्रियत्वेमानाभावात्सुषुप्तिप्राक्कालेनिर्विकल्पकमेवजायतेइत्यत्रप्रमाणाभावात्॥अथज्ञानमात्रेत्वङ्मनःसंयोगस्यकारणत्वंतदाश्रयनचाक्षुषादिप्रत्यक्षकालेत्वाचप्रत्यक्षंस्यात्॥विषयत्वक्संयोगस्यत्वङ्मनःसंयोगस्यचसत्वात्।परस्परप्रतिबंधादेकमपिवानस्यादितिअत्रकेचित्॥पूर्वोक्तयुक्त्यात्वङ्मनःसंयोगस्यहेतुत्वेसिद्धेचाक्षुषादिसामग्र्याःस्पर्शनादिप्रतिबन्धकत्वमनुभवानुरोधात्कल्प्यतइति॥अन्येतु॥चक्षुष्यनुरोधाच्चर्ममनःसंयोगस्यज्ञानहेतुत्वंकल्प्यम्॥चाक्षुषादिप्रत्यक्षकालेत्वङ्मनःसंयोगस्याभावान्नत्वाचंप्रत्यक्षमितिवदन्ति॥मनोग्राह्यमिति॥मनोजन्यप्रत्यक्षविषयः॥मतिर्ज्ञानम्॥कृतिर्यत्नः॥एवंसुखत्वादिकंमनोग्राह्यम्॥ए

मनोग्राह्यंसुखंदुःखमिच्छाद्वेषौमतिःकृतिः॥५८॥ज्ञानंयन्निर्विकल्पाख्यंतदतीन्द्रियमिष्यते॥

वमात्मापिमनोग्राह्यः॥किन्तुमनोमात्रस्यगोचरइत्यनेनपूर्वमुक्तत्वादत्रनोक्तः॥निर्विकल्पाख्यमिति॥चक्षुःसंयोगाद्यनन्तरंघटइत्याकारकंघटत्वादिविशिष्टज्ञानंनसम्भवति॥पूर्वंविशेषणस्यघटत्वादेर्ज्ञानाभावात्॥विशिष्टबुद्धौविशेषणज्ञानस्यकारणत्वात्॥तथाचप्रथमंघटघटत्वयोर्वैशिष्ट्यानवगाहिज्ञानंजायते॥तदेवनिर्विकल्पकम्॥तच्चनिर्विकल्पकंनप्रत्यक्षम्॥तथाहि॥वैशिष्ट्यानवगाहिज्ञानस्यप्रत्यक्षंनभवति॥घटमहंजानामीतिप्रत्ययात्॥तत्रआत्मनिज्ञानंप्रकारीभूयभासते॥ज्ञानेघटस्तत्रघटत्वंप्रकारीयःसएवविशेषणमित्युच्यते।विशेषणेयद्विशेषणंतद्विशेषणतावच्छेदकमित्युच्यते॥विशेषणतावच्छेदकप्रकारकंज्ञानंविशिष्टवैशिष्ट्यज्ञानेकारणम्॥निर्विकल्पकेचघटत्वादिकंनप्रकारस्तेनघटत्वादिविशिष्टंघटादिवैशिष्ट्यभानंज्ञानेनसम्भवति।घटत्वाद्य

प्रकारकंघटादिविशिष्टज्ञानंभवति।

जात्यतिरिक्तपदार्थज्ञानस्यकिंचिद्धर्मप्रकारकत्वात्॥ महत्त्वंषड्विधमिति॥ द्रव्यप्रत्यक्षेमहत्त्वंसमवायसंबंधेनकारणम्॥ द्रव्यसमवेतासमवेतनांगुणकर्मसामान्यानांप्रत्यक्षेस्वाश्रयसमवायसम्बन्धेन॥ द्रव्यसमवेतसमवेतानांगुणत्वकर्मत्वरूपत्वादीनांप्रत्यक्षेस्वाश्रयसमवेतसमवायसम्बन्धेन॥ इन्द्रियमिति॥ अत्रापिषड्विधत्वमनुषज्यते॥ इंद्रियत्वंतुनजातिः॥ पृथिवीत्वादिनासाङ्कर्यात्॥ किन्तुशब्देतरोद्भूतविशेषगुणानाश्रयत्वेसतिज्ञानकारणमनःसंयोगाश्रयत्वम्॥ आत्मादिवारणायसत्यंतम्॥ उद्भूतविशेषगुणस्यशब्दस्यश्रोत्रेपिसत्वाच्छब्देतरेति॥ विशेषगुणस्यरूपादेश्चक्षुरादावपिसत्वाद्भूतेति॥ उद्भूतत्वंनजातिः॥ शुक्लत्वादिनासाङ्कर्यात्॥ नचशुक्लत्वादिव्याप्यंनानैवोद्भूतत्वमितिवाच्यम्॥ उद्भूतरूपत्वादिनाचाक्षुषादौहेतुत्वानुपपत्तेः॥ किन्तुशुक्लत्वादिव्याप्यंनानैवोनुद्भूतत्वंतद्

महत्त्वंषट्विधेहेतुरिन्द्रियंकरणंमतम्॥ ५९॥ विषयेन्द्रियसंबंधोव्यापारःसोपिषट्विधः॥

भावकूटश्चोद्भूतत्वम्॥ तच्चसंयोगादावप्यस्तितथाचशब्देतरोद्भूतगुणसंयोगादिश्चक्षुरादावप्यस्त्यतोविशेषेति॥ कालादिवारणायविशेष्यदलम्॥ इन्द्रियावयवविषयसंयोगस्यापिप्राचांमतेप्रत्यक्षजनकत्वादिन्द्रियावयववारणायकालादौरूपाभावप्रत्यासेसन्निकर्षघटकतयाकारणीभूतचक्षुःसंयोगाश्रयस्यकालादेर्वारणायमनःपदम्॥ ज्ञानकारणमित्यपितद्वारणाय॥ करणमिति॥ असाधारणंकारणंकरणम्॥ असाधारणत्वंव्यापारवत्त्वम्॥ विषयेन्द्रियसम्बन्धोव्यापारइति॥ व्यापारःसन्निकर्षः॥ षड्विधंसन्निकर्षमुदाहरणद्वाराप्रदर्शयति॥ ॥ द्रव्यग्रहस्तुसंयोगादिति॥ ॥ द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्॥ द्रव्यसमवेत

प्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्॥एवमग्रेपि॥वस्तुतस्तु द्रव्यचाक्षुषत्वावच्छिन्नेप्रतिचक्षुःसंयोगः कारणम्॥द्रव्यस
मवेतचाक्षुषंप्रतिचक्षुःसंयुक्तसमवायःकारणम्॥द्रव्यसमवेतसमवेतचाक्षुषंप्रतिचक्षुःसंयुक्तसमवेतसमवायःकारणम्॥ एवमन्य ५५
त्रापिविशिष्यैवकार्यकारणभावः॥परन्तुपृथिवीपरमाणुनीलेनीलत्वंपृथिवीपरमाणोःपृथिवीत्वंचचक्षुषाकथंनगृह्यतेतत्रपरम्प
रयोद्भूतरूपसम्बन्धस्यमहत्त्वसम्बन्धस्यचसत्त्वात्॥तथाहि॥नीलत्वजातिरेकैवपरमाणुनीलेघटनीलेचवर्त्तते॥तथाचम त्वस
म्बन्धोघटनीलमादाय वर्त्ततेरूपसम्बन्धस्तूभयमादायवर्त्ततेः॥एवंपृथिवीत्वेपिघटादिकमादायमहत्त्वसंबन्धोबोध्यः॥एव
वायौनतीयस्पर्शादौचसत्तायाश्चाक्षुषप्रत्यक्षंस्यात्॥तस्मादुद्भूतरूपवच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्यद्रव्यसमवेत

द्रव्यग्रहस्तुसंयोगात्संयुक्तसमवायतः॥६०॥द्रव्येषुसमवेतानांतथातत्समवायतः॥तत्रापिसमवेतानांशब्दस्य
समवायतः॥६१॥तत्तद्वृत्तीनांसमवेतसमवायेनतुग्रहः॥विशेषणतयातद्भावानांग्रहोभवेत्॥६२॥ ॥ ॥

प्रत्यक्षेकारणत्वंतादृशचक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेतप्रत्यक्षेकारणत्वंवाच्यम्॥ इत्थञ्चपरमाणुनीलादीन
नीलत्वादिग्रहः॥परमाणुचक्षुःसंयोगस्यमहत्त्वावच्छिन्नत्वाभावात्॥एवंवाय्वादीनसत्तादिचाक्षुषम्॥तत्रचक्षुःसंयोगस्यरूपा
वच्छिन्नत्वाभावात्॥एवंयत्रघटस्यपृष्ठावच्छेदेनआलोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेननत्रघटप्रत्यक्षाभावात् आलोकसं
योगावच्छिन्नत्वंचक्षुःसंयोगेविशेषणबोध्यम्॥एवंद्रव्यस्पार्शनप्रत्यक्षेत्वक्संयोगःकारणम्॥द्रव्यसमवेतस्पार्शनप्रत्यक्षेत्वक्सं
युक्तसमवायःकारणम्॥ द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवायः कारणम्॥ अत्रापिमहत्त्वावच्छिन्न

सिमु १८

त्वमुद्भूतस्पर्शावच्छिन्नत्वंचपूर्ववदेवबोध्यम्॥एवंगन्धप्रत्यक्षेघ्राणसंयुक्तसमवायः॥रसप्रत्यक्षेरसनासंयुक्तसमवायः॥गन्धसमवेतस्यघ्राणजन्यप्रत्यक्षेघ्राणसंयुक्तसमवेतसमवायः॥रससमवेतस्यरसनप्रत्यक्षेरसनासंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः॥शब्दसमवेतस्यश्रावणप्रत्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः॥अत्रसमवेतप्रत्यक्षंलौकिकंबोध्यम्॥वक्ष्यमाणमलौकिकमिन्द्रियसंयोगंविनापिभवति॥एवमात्मप्रत्यक्षेमनःसंयोगः॥आत्मसमवेतमानसप्रत्यक्षेमनःसंयुक्तसमवायः॥आत्मसमवेतसमवेतमानसप्रत्यक्षेमनःसंयुक्तसमवेतसमवायःकारणं॥अभावप्रत्यक्षेसमवायप्रत्यक्षेचेन्द्रियसंबन्धविशेषणताहेतुः॥वैशेषिकमतेनुसमवायोनप्रत्यक्षः॥अत्रयद्यपिविशेषणतानानाविधा॥तथाहि॥भूतलादौघटाभावः संयुक्तविशेषणतयागृह्यते॥संख्या

यदिस्यादुपलभ्येतेत्येवंयत्रप्रसज्यते।प्रत्यक्षंसमवायस्यविशेषणतयाभवेत्॥६३॥ } दौचरूपाद्यभावः संयुक्तसमवेतविशेषणतयागृह्यते। संख्यात्वादौरूपाद्यभावःसंयुक्तसमवेतसमवेतविशेषणतया।शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतयागृह्यते। कादौरत्वाभावःश्रोत्रावच्छिन्नसमवेतविशेषणतया। एवंकत्वावच्छिन्नाभावेरत्वाभावादिकंविशेषणविशेषणतयागृह्यते।पटाभावादौघटाभावः संयुक्तविशेषविशेषणतया।एवमन्यदप्यूह्यंतथापिविशेषणत्वेनैकैवसागृह्यते।अन्यथाघोढासन्निकर्षइतिप्राचांप्रवादोहन्येतइति॥ यदिस्यादिति॥ अभावप्रत्यक्षेयोग्यानुपलब्धिःकारणम्॥ तथाहि॥भूतलादौघटादिज्ञानेजातेघटाभावादिकंनज्ञायते॥तेनाऽभावोपलम्भेप्रतियोग्युपलम्भाभावःकारणम्॥ तत्रयोग्यताप्यपेक्षिता॥सापिप्रतियोगिसत्वप्रसञ्जनप्रसञ्जिनप्रतियोगिकत्वरूपातदर्थश्चप्रतियोगिनोघटादेःसत्वप्रसक्त्याप्रसञ्जितउपलम्भरूपप्रतियोगीयस्यसउपलम्भाभावोऽभावप्रत्यक्षेहेतुः १८

तथाहि॥यत्रआलोकसंयोगादिकंवर्त्ततेतत्रयद्यत्रघटःस्यात्तर्हिउपलभ्येतेतिआपादयितुंशक्यते॥तत्रघटाभावादिकंप्रत्यक्षंभवति॥अन्धकारेतु
नापादयितुंशक्यतेतेनघटाभावादेरन्धकारेनचाक्षुषप्रत्यक्षम्॥स्पार्शनप्रत्यक्षंतुभवत्येव॥आलोकसंबन्धंविनापिस्पार्शनप्रत्यक्षस्यापादयि
तुंशक्यत्वात्॥गुरुत्वादिकंयद्योग्यंतद्भावस्तूनप्रत्यक्षः॥तत्रगुरुत्वस्यापादयितुमशक्यत्वात्॥वायौउद्भूतरूपाभावःपाषाणेसौरभाभावः
गुडेतिक्ताभावःवन्हावनुष्णत्वाभावश्रोत्रेशब्दाभावः आत्मनिसुखाभावः एवमादयस्तत्तदिंद्रियेगृह्यंते॥तत्रतत्तत्प्रत्यक्षस्यापादयितुं
शक्यत्वात्॥संसर्गाभावप्रत्यक्षेप्रतियोगिनोयोग्यता॥अन्योन्याभावप्रत्यक्षेअधिकरणयोग्यत्वमपेक्षितम्॥अतस्तस्माद्दौपिशाचादिभि
रपिचक्षुषागृह्यतएव॥प्रत्यक्षंलौकिकालौकिकभेदेनद्विविधम्॥तत्रलौकिकप्रत्यक्षेषोढाःसन्निकर्षाउक्ताः॥अलौकिकप्रत्यक्षेसन्निकर्षो-

अलौकिकस्तूव्यापारस्त्रिविधःपरिकीर्तितः॥सामान्यलक्षणोज्ञानलक्षणोयोगजस्तथा॥६४॥

नि दानींवदंति॥अलौकिकस्तूव्यापारइति॥व्यापारस्सन्निकर्षः॥सामान्यलक्षणइति॥सामान्यंलक्षणंयस्येत्यर्थः॥तत्रलक्षणपदेन
यदिस्वरूपमुच्यते॥तदासामान्यस्वरूपप्रत्यासत्तिरित्यर्थोलभ्यते॥तच्चइन्द्रियसंबद्धविशेष्यकज्ञानेप्रकारीभूतंबोध्यम्॥तथाहि॥यत्रइ
न्द्रियसंयुक्तोधूमादिस्तद्विशेष्यकंधूमइतिज्ञानंजातंतत्रज्ञानेधूमत्वंप्रकारः तत्रधूमत्वेनसन्निकर्षेणधूमादित्येवंसकलधूमविषयकंज्ञा
नंजायते॥अत्रयदिइन्द्रियसंबद्धमित्येवोच्यतेतदायत्रधूलीपटलेधूमत्वइतिविज्ञातंतत्रतेनसन्निकर्षेणसकलधूमविषयकंज्ञानंनस्या
त्॥तत्रधूमत्वेनसहइन्द्रियसंबन्धाभावात्॥मन्मतेत्विन्द्रियसंबद्धंधूलीपटलंतद्विशेष्यकंधूमइतिज्ञानंतत्रप्रकारीभूतधूमत्वंप्रत्यासत्तिः
॥इन्द्रियसंबन्धश्चलौकिकोग्राह्यः॥इदंचबहिरिन्द्रियस्थले॥मानसस्थलेतुज्ञानंप्रकारीभूतंसामान्यंप्रत्यासत्तिः॥परन्तुसमानानांभावः

सामान्यंतच्चक्वचिन्नित्यंधूमत्वादि॥क्वचिच्चानित्यंघटादि॥यत्रैकोघटःसंयोगसंबन्धेनभूतलेसमवायसम्बन्धेनकपालेवाज्ञातस्तदनंतरं
सर्वेषांतद्वतांभूतलादीनांकपालानांवाज्ञानंभवतितत्रेदंबोध्यम्॥परन्तुसामान्यंयेनसंबन्धेनज्ञायतेतेनसंबन्धेनाधिकरणानांप्रत्यास
त्तिः॥किंतुयत्रतद्वतोज्ञानंतत्रतद्वतःस्मरणंजातंतत्रसामान्यलक्षणयासर्वेषांतद्वतांभानंनस्यात्॥सामान्यस्यतदानीमभावात्॥किंचइन्द्रियसंब
द्धविशेष्यकंघटइतिज्ञानंयत्रजातंतत्रपरइन्द्रियसंबंधंविनापितादृशज्ञानप्रकारीभूतसामान्यस्यसत्वात्सकलघटविषयकंज्ञानंकुतोनजाय
ते॥तस्मात्सामान्यज्ञानंप्रत्यासत्तिर्नतुसामान्यमित्याह॥आसत्तिरिति॥प्रत्यासत्तिरित्यर्थः॥तथाचसामान्यंलक्षणंयस्येत्यत्रलक्षणशब्दस्य
विषयोऽर्थः॥तेनसामान्यविषयकंज्ञानंप्रत्यासत्तिरित्यर्थोलभ्यते॥ननुचक्षुःसंयोगादिकंविनापिसामान्यज्ञानंयत्रवर्त्ततेतत्रसकलघटादीनांप्र

आसत्तिराश्रयाणांतुसामान्यज्ञानमिष्यते॥तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते॥६५॥विषयीयस्यतस्यैवव्यापारोज्ञानलक्षणः॥

त्यक्षंस्यादतआह॥तदिन्द्रियजेति॥अस्यार्थः॥यद्बहिरिन्द्रियेणसामान्यलक्षणयाज्ञानंजननीयंतदायत्किंचिद्धर्मिणितत्सामान्यज्ञानस्य
तदिन्द्रियजन्यज्ञानसामग्र्यपेक्षिता॥साचसामग्रीचक्षुःसंयोगालोकसंयोगादिका॥तेनान्धकारेचक्षुरादिनातादृशज्ञानंनजायते॥ननुज्ञा
नलक्षणाप्रत्यासत्तिर्ज्ञानरूपासामान्यलक्षणापियदिज्ञानरूपातर्हितयोर्भेदोनस्यादतआह॥विषयीयस्येति॥सामान्यज्ञानप्रत्यास
त्तिर्हितदाश्रयस्यज्ञानंजनयति॥ज्ञानलक्षणाप्रत्यासत्तिस्तुयद्विषयकंज्ञानंतस्यैवप्रत्यासत्तिरिति॥अयमर्थः॥प्रत्यक्षेसन्निकर्षवि
नाभानंनसम्भवति॥धूमत्वेनसकलधूमानांवन्हित्वेनसकलवन्हीनांचकथंज्ञानंभविष्यतितदर्थंसामान्यलक्षणास्वीक्रियते॥नचसक
लवन्हिधूमभानाभावेकाक्षतिरितिवाच्यम्॥प्रत्यक्षधूमेवन्हिसंबन्धस्यगृहीतत्वात्।अन्यधूमस्यचानुपस्थितत्वाद्धूमोवन्हिव्याप्यान १९

तथात्वसामान्यलक्षणांविना

वेनिसंशयानुपपत्तेः॥मन्मतेनुसामान्यलक्षणयासकलधूमोपस्थितौकालान्तरीयदेशांतरीयवन्हिव्याप्यत्वसंदेहः सम्भवति॥नचसामान्यलक्षणास्वीकारेप्रमेयत्वेनसकलप्रमेयज्ञानेजातेसार्वज्ञतापत्तिरितिवाच्यम्॥प्रमेयत्वेनसकलज्ञानेजातेपिविशिष्यसकलपदार्थानामज्ञातत्वेनसार्वज्ञत्वाभावात्॥एवंज्ञानलक्षणायाअस्वीकारेसुरभिचन्दनमितिज्ञानेसौरभ्यभानंकथंस्यात्॥अत्रयद्यपिसामान्यलक्षणयापिसौरभस्यभानंसम्भवतितथापिसौरभत्वस्यभानंज्ञानलक्षणया॥एवंधूमत्वेनधूलीपटलंयत्रज्ञातंतत्रधूलीपटलस्यानुव्यवसायेभानंज्ञानलक्षणया॥योगिनोहिद्विधादृष्टि॥युक्ताःयुंजानाश्च॥अतोयोगजधर्मस्यापिहैविध्यम्॥युक्तस्यतावद्योगजधर्मसहायेनमनसाआकाशपरमाण्वादिनिरवलपदार्थगोचरंज्ञानंसर्वदैवभवितुमर्हति॥द्वितीयस्यचिन्ताविशेषापिसहकारी॥प्रत्यक्षवप्तुसमा

योगिनोहिविधाःप्रोक्तायुक्तयुंजानभेदतः॥६६॥युक्तस्यसर्वदाभानंचिन्तासहकृतोपरः॥व्यापारस्तत्परामर्शःकरणंव्याप्तिधीर्भवेत्
॥६७॥अनुमायांज्ञायमानंलिंगंतुकरणंनहि॥अनागतादिलिङ्गेनस्यादनुमितिस्तदा॥६८॥ } सम्॥ श्रीगणेशायनमः॥ अनुमितिंव्युत्पादयति॥ व्यापारस्त्विति॥अनुमितौव्याप्तिज्ञानंकरणंपरामर्शोव्यापारः तथाहि॥येनपुरुषेणमहानसादौधूमेवन्हिव्याप्तिर्गृहीतापश्चाच्चसएवपुरुषः क्वचित्सर्वनाद्रौअनविच्छिन्नमूलांधूमरेखांपश्यतितदनन्तरंधूमोवन्हिव्याप्यइत्येवंरूपंव्याप्तिस्मरणंनस्यभवति॥पश्चाच्चवन्हिव्याप्यधूमवानयंपर्वतइतिज्ञानंभवति॥सएवपरामर्शइत्युच्यते॥तदनन्तरंपर्वतोवन्हिमानितिज्ञानंजायतेनदेवानुमितिरिति॥अत्रप्राचीनावदन्ति॥व्याप्यत्वेनज्ञायमानंधूमादिलिङ्गमनुमितिकरणमितितदूषयति॥ज्ञायमानमिति॥लिङ्गस्यानुमितिअकरणत्वेयुक्तिमाह॥अनागतादीति॥यद्यनुमितौलिङ्गंकरणंस्यात्॥तदाअनागतेनविनष्टेनवालिङ्गेनानुमितिर्नस्यात्॥ ॥ ७ ॥ ॥

अनुमितिकरणस्यलिङ्गस्यतदानीमभावात्॥ व्याप्यस्येति॥ व्याप्तिविशिष्टस्यपक्षेणसहवैशिष्ट्यावगाहिज्ञानमनुमितौजनकम्॥ तच्च व्याप्यपक्षदृतिज्ञानम्॥ पक्षेव्याप्यवानितिज्ञानेवा॥ अनुमितिस्तुपक्षेव्याप्यदृतिज्ञानात्पक्षेसाध्य दृत्याकारिका॥ पक्षोव्याप्यवानितिज्ञानात्पक्षःसाध्यवानित्याकारिका॥ द्विविधादृपिपरामर्शात्पक्षःसाध्यवानित्येवानुमितिरित्यन्ये॥ ननुवन्हिव्याप्यधूमवानयंपर्वतइति ज्ञानंविनापियत्रपर्वतोधूमवानितिप्रत्यक्षतोवन्हिव्याप्योधूमदृतिस्मरणम्॥ तत्रज्ञानहूयादेवानुमितिदर्शनाच्चव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानेन सर्वत्रकारणम्॥ किन्तुव्याप्यतावच्छेदक प्रकारकपक्षधर्मताज्ञानत्वेनहेतुत्वंभावश्यकत्वात्॥ विशिष्टज्ञानकल्पनागौरवाच्चेति चेन्न॥ व्याप्यतावच्छेदकाज्ञानेपिवन्हिव्याप्यवानितिज्ञानादनुमित्यत्पत्तेः॥ लाघवाच्चव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेनैवहेतुत्वम्

व्याप्यस्यपक्षवृत्तित्वधीःपरामर्शउच्यते॥

॥किञ्चवूमवानयंपर्वतइतिज्ञानादनुमित्यापत्तिः॥ व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्यसत्त्वात्॥ नचगृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यहेतुत्वंवाच्यम्॥ चैत्रस्यव्याप्तिग्रहेमैत्रस्यपक्षधर्मताज्ञानादनुमित्यापत्तेः॥ यदितुतत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानंतत्पुरुषीयानुमितौहेतुरित्युच्यतेतदाअनन्तकार्यकारणभावः। मन्मतेतुसमवायसम्बन्धेनव्याप्तिप्रकारकपक्षधर्मताज्ञानंसमवायेनानुमितिंजनयतीत्यर्थेनानन्तकार्यकारणभावः। यदितुव्याप्तिप्रकारकंज्ञानंपक्षधर्मताज्ञानंचस्वतन्त्रंकारणमित्युच्यते तदाकार्यकारणभावद्वयम्॥ वन्हिव्याप्योधूमआलोकवान्पर्वतदृतिज्ञानादप्यनुमित्यापत्तिः। दृश्यत्वंयत्रज्ञानहूयंतत्रापिविशिष्टज्ञानेकल्पनीयम्॥ फलमुखगौरवस्यादोषत्वात्॥ ॥ २०

व्याप्योनामव्यास्याश्रयस्तत्रव्याप्तिःकेत्यतआह॥व्याप्तिरिति॥वह्निमान्धूमादित्यादौसाध्योवन्हिःसाध्यवान्महानसादिस्तदन्योजलह्रद
दिस्तदवृत्तित्वंधूमस्येतिलक्षणसमन्वयः॥धूमवान्वन्हेरित्यादौसाध्यवदन्यस्मिन्नयःपिण्डादौवन्हेःसत्वान्नातिव्याप्तिः॥अत्रयेनसंबन्धे
नसाध्यन्तेनैवसम्बन्धेनसाध्यवान्बोध्यः॥अन्यथासमवायसंबन्धेनवन्हिमान्वन्हेरवयवस्तदन्योमहानसादिस्तत्र धूमस्यविद्यमानत्वा
दव्याप्तिप्रसङ्गात्॥साध्यवदन्यःसाध्यवत्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः॥तेनयत्किञ्चिद्वन्हिमतोमहानसादेर्भिन्नेपर्वतादौ
धूमस्यसत्वेपिनक्षतिः॥येनसम्बन्धेनहेतुतातेनैवसम्बन्धेनसाध्य वदन्यावृत्तित्वंबोध्यम्॥तेनवन्हिमदन्यस्मिन्धूमावयवेधूमस्यस
मवायसंबन्धेनसत्वेपिनक्षतिः॥साध्यवदन्यावृत्तित्वंचसाध्यवदन्यवृत्तित्वसामान्याभावः।तेनधूमवान्वन्हेरित्यत्रसाध्यवदन्यजल

व्याप्तिःसाध्यवदन्यस्मिन्नसम्बन्धउदाहृतः॥६९॥अथवाहेतुमन्निष्ठविरहप्रतियोगिना॥साध्येनहेतोरैकाधिकरण्यंव्याप्तिरुच्यते ७०

ह्रदादिवृत्तित्वाभावेपिनातिव्याप्तिः।अत्रयद्यपिद्रव्यंगुणकर्मान्यत्वविशिष्टसत्वादित्यादौविशिष्टसत्तायाःसत्तायाश्चैक्यात्साध्यवदन्य
स्मिन्गुणादावृत्तित्वंनास्तितथापिहेतुतावच्छेदकरूपेणावृत्तित्ववाच्यम्॥हेतुतावच्छेदकतादृशवृत्तितानवच्छेदकमितिफलितो
र्थः॥ननुकेवलान्वयिनिश्चेयत्वादौसाध्येसाध्यवदन्यस्याप्रसिद्ध्यात्कथंव्याप्तिः॥किंचसत्तावान्जातेरित्यादौसाध्यवदन्यस्मिन्सामान्या
दौहेतुतावच्छेदकसंबन्धेनसमवायेनवृत्तेरप्रसिद्ध्यात्कथंव्याप्तिरतआह॥अथवेति॥हेतुमतिनिष्ठावृत्तियेस्यसतथाविरहोऽभावः॥ता
वाचेहत्यधिकरणेवृत्तिर्योऽभावस्तत्प्रतियोगिनासाध्येनसहहेतोःसामानाधिकरण्यंव्याप्तिः॥यद्यपिवन्हिमान्धूमादित्यादौहेत्वधिकर
णपर्वतादिवृत्तिअभावप्रतियोगित्वंतत्तद्ध्रदादेरस्तीत्यव्याप्तिः॥नचसमानाधिकरणवह्निधूमयोरेवव्याप्तिरितिवाच्यम्॥तद्धेरप्यु

भयाभावादिसत्वादेकसत्वेपिद्रव्यंनास्तीतिप्रतीतेः॥गुणवान्द्रव्यत्वादित्यादौअव्याप्तिश्च॥तथापिसाध्यतावच्छेदकंप्रतियोगितानवच्छेदकं
तदवच्छिन्नसामानाधिकरण्यंव्याप्तिरितिवाच्यम्॥ननुरूपत्वव्याप्यजातिमान्पृथिवीत्वादित्यत्रसाध्यतावच्छेदिकारूपत्वव्याप्यजा
तयस्तासांचशुक्लत्वादिरूपाणांनीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरितिचेन्न॥तत्रपरम्परयारूपत्वव्याप्यजा
तित्वस्यैवसाध्यतावच्छेदकत्वात्॥नहितादृशधर्मावच्छिन्नाभावःक्वापिपृथिव्यामस्ति॥रूपत्वव्याप्यजातिमान्नास्तीतिप्रतीत्यापत्तेः
॥साध्यादिभेदेनव्याप्तेर्भेदात्तादृशस्थलेसाध्यतावच्छेदकतावच्छेदकंप्रतियोगितावच्छेदकतानवच्छेदकमित्येवलक्षणघटक
मित्यपिवदन्ति॥एवंदण्ड्यादौसाध्येपरम्परयादण्डत्वस्यैवसाध्यतावच्छेदकत्वम्॥हेत्वधिकरणंचहेतुतावच्छेदकविशिष्टाधि
करणंवाच्यम्॥तेनद्रव्यंगुणकर्मान्यत्वविशिष्टसत्वादित्यादौगुणसत्वाधिकरणगुणनिष्ठाभावप्रतियोगित्वेपिद्रव्यत्वस्यनाव्याप्तिः
हेतुतावच्छेदकसम्बन्धेनहेत्वधिकरणंबोध्यम्॥तेनसमवायेनधूमाधिकरणतद्वयवनिष्ठाभावप्रतियोगित्वेपिवह्नेर्नाव्याप्तिः॥अ
भावश्चप्रतियोगिव्यधिकरणोबोध्यः॥तेनकपिसंयोगीएतद्वृक्षत्वादित्यत्रमूलावच्छेदेनएतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेपि
कपिसंयोगस्यनाव्याप्तिः॥नचप्रतियोगिव्यधिकरणत्वंयदिप्रतियोग्यनधिकरणवृत्तित्वंनदातत्रैवाव्याप्तिः॥प्रतियोगिनःकपिसंयो
गस्यानधिकरणेगुणादौवर्त्ततेयोऽभावस्तस्यैववृक्षेमूलावच्छेदेनसत्वात्॥यदिप्रतियोग्यधिकरणावृत्तित्वंतदासंयोगीसत्वादित्या
दावतिव्याप्तिः॥सत्ताधिकरणगुणादौयःसंयोगाभावस्तस्यप्रतियोग्यधिकरणद्रव्यवृत्तित्वादितिवाच्यम्॥हेत्वधिकरणेप्रतियोग्यन
धिकरणवृत्तित्वविशिष्टस्यविवक्षितत्वात्॥स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावइतिनिष्कर्षः॥प्रतियोग्यनधिकर
णंचप्रतियोगितावच्छेदकावच्छिन्नाधिकरणंबोध्यम्॥तेनविशिष्टसत्तावान्जातेरित्यादौजात्यधिकरणगुणादेर्विशिष्टसत्ताभावप्र

तियोगिसत्ताधिकरणत्वेपिनक्षतिः॥अत्रसाध्यतावच्छेदकसंबन्धेनप्रतियोग्यनधिकरणत्वंवाच्यम्॥तेननज्ञानवान्सत्वादित्यादौसत्वाधिकर
णघटादेर्विषयतासम्बन्धेनज्ञानाधिकरणत्वेपिनक्षतिः॥इत्यन्यत्रवह्निमान्धूमादित्यादौधूमाधिकरणेसमवायेनवह्निविरहसत्वेपिनक्षतिः
॥ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिदनधिकरणंतत्सामान्यस्यवा॥यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकर
णत्वंवाविवक्षितम्॥आद्येकपिसंयोगीएतद्वृक्षत्वादित्यादावव्याप्तिः॥कपिसंयोगाभावस्यहिप्रतियोगितावच्छेदकावच्छिन्नोवृक्षावृत्तिर
पिकपिसंयोगोभवतितदनधिकरणंवृक्षइति॥द्वितीयेतुप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः॥सर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्ट
स्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्॥नचवह्निमान्धूमादित्यादौघटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रति
योग्यधिकरणत्वंयद्यपिपर्वतादे स्तथापिसाध्यतावच्छेदकसंबन्धेनतत्प्रतियोग्यनधिकरणत्वमस्त्येवेतिकथंप्रतियोगिव्यधिकर
णाभावाप्रसिद्धिरितिवाच्यम्॥घटाभावेयोवन्त्यभावस्तस्यघटाभावात्मकतयाघटाभावस्यवह्निरपिप्रतियोगितदधिकरणंपर्वतादि
तिक्रमेणप्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात्॥यदितुघटाभावावन्त्यभावादिर्भिन्नइत्युच्यते।तथापिधूमाभाववान्वन्त्यभावा
दित्यादावव्याप्तिः॥तत्रसाध्यतावच्छेदकसंबंधस्वरूपसंबन्धस्तेनसंबंधेनसर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्र
तियोग्यधिकरणत्वंहेत्वधिकरण स्येति॥तृतीयेतुकपिसंयोगाभाववान्नात्मत्वादित्यादावव्याप्तिः॥नत्वात्मवृत्तिकपिसंयोगाभावाभा
वःकपिसंयोगस्तस्यप्रतियोगितावच्छेदकंगुणसामान्याभावत्वमपितद्वच्छिन्नानधिकरणत्वंहेत्वधिकरणस्यात्मनइतिमैवम्॥
यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्यविवक्षितत्वात्॥ननुकालो
घटवान्कालपरिमाणादित्यत्रप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः॥हेत्वधिकरणस्यमहाकालस्यजगदाधारतयासर्वैषामेवा

भावानांसाध्यतावच्छेदकसम्बन्धेनकालिकविशेषणतयाप्रतियोग्यधिकरणत्वसत्वात् ॥ अत्रकेचित् ॥ महाकालान्यत्वविशि
ष्टघटाभावस्तत्रप्रतियोगिव्यधिकरणः ॥ महाकालस्यघटाधारत्वेपिमहाकालान्यत्वविशिष्टघटानाधारत्वात् ॥ महाकालेम
हाकालभेदाभावात् ॥ वस्तुतस्तुप्रतियोगितावच्छेदकसम्बन्धेनप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगिता
सामान्येयत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेनसंबन्धेनतद्धर्मावच्छिन्नस्यतद्धेतुव्यापकत्वंबोध्यम् ॥ व्याप
कसामानाधिकरण्यंव्याप्तिः ॥ यत्संबन्धःसाध्यतावच्छेदकसंबन्धः यद्धर्मः साध्यतावच्छेदकधर्मः । तत्रयदि यद्धर्मावच्छिन्न,
त्वभावमात्रमित्युच्यते ॥ तदासमवायेनयोवृत्त्यभावस्तस्यप्रतियोगितावच्छेदकसम्बन्धः समवायस्तेनप्रतियोग्यनधिकरणपर्व
तादिवृत्तिः सएवतत्प्रतियोगितावच्छेदकंच वह्नित्वमित्यव्याप्तिःस्यात् ॥ यदिचयत्संबन्धावच्छिन्नत्वाभावमात्रमुच्यते ॥ तदा
तादृशःस्यसंयोगेनघटाभावस्यप्रतियोगितायांसंयोगसम्बन्धावच्छिन्नत्वसत्वादव्याप्तिःस्यादतउभयमुपात्तम् ॥ इत्थञ्चका
लोघटवान् कालपरिमाणादित्यादौसंयोगसम्बन्धेनघटाभावप्रतियोगिनोघटस्यानधिकरणेहेत्वधिकरणेमहाकालेवर्त्त
मानः सएवसंयोगेनघटाभावस्तस्यप्रतियोगितायांकालिकसम्बन्धावच्छिन्नत्वघटत्वधर्मावच्छिन्नत्वोभयाभावसत्वान्ना
व्याप्तिः ॥ धूमवान्वह्नेरित्यादौअतिव्याप्तिवारणायसामान्यपदमुपात्तम् ॥ ननुप्रमेयवह्निमान्धूमादित्यादौप्रमेयवन्निष्ठत्वावच्छि
न्नत्वमप्रसिद्धम् ॥ गुरुधर्मस्यानवच्छेदकत्वादितिचेन्न ॥ कम्बुग्रीवादिमान्नास्तीतिप्रतीत्याकम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियो
गिताविषयीकरणेनगुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादितिसङ्क्षेपः ॥

पक्षवृत्तित्वमित्यत्रपक्षत्वंकिंतदाह॥सिषाधयिषयेति॥सिषाधयिषाविरहविशिष्टायाः सिद्धेरभावःपक्षता॥तद्ग्रान्यक्षदित्यर्थः॥
सिषाधयिषामात्रेनपक्षता॥विनापिसिषाधयिषांघनगर्जितेनमेघानुमानात्॥अतएवसाध्यसन्देहोपिनपक्षता॥विनापिसन्दे
हेनघनगर्जितेनमेघानुमानात्॥सिद्धौसत्यामपिसिषाधयिषासत्त्वेनुमितिर्भवत्येव॥अतःसिषाधयिषाविरहविशिष्टत्वंसिद्धौवि
शेषणम्॥तथाचयत्रसिद्धिर्नास्तितत्रसिषाधयिषायांसत्यामसत्यामपिपक्षता॥यत्रसिषाधयिषाअस्तितत्रसिद्धौसत्यामस-
त्यांचपक्षता॥यत्रचसिद्धिरस्तिसिषाधयिषाचनास्तितत्रनपक्षता॥सिषाधयिषाविरहविशिष्टसिद्धेःसत्वात्॥ननुयेत्रपरामर्शा
नन्तरंसिद्धिस्ततः सिषाधयिषातत्रसिषाधयिषाकालेपरामर्शाभावान्नानुमितिः॥यत्रसिद्धिपरामर्शसिषाधयिषाः क्रमेणभव

॥सिषाधयिषयाशून्यासिद्धिर्यत्रनतिष्ठति॥सपक्षस्तत्रवृत्तित्वज्ञानादनुमितिर्भवेत्७१

न्ति॥तत्रसिषाधयिषाकालेसिद्धेर्नाशात्प्रतिबन्धकाभावादेवानुमितिः॥यत्रसिषाधयिषासिद्धिपरामर्शाःसन्तितत्रपरामर्शकाले
सिषाधयिषैवनास्ति॥एवमन्यत्रापिसिद्धिकालेपरामर्शकालेनसिषाधयिषायोग्यविभुविशेषगुणानांयोगपद्यनिषेधात्॥तत्कुतः
सिषाधयिषाविरहविशिष्टत्वंसिद्धेर्विशेषणमितिचेन्न॥यत्रवह्निव्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षस्मरणवाततः सिषाध
यिषातत्रपक्षतासम्पत्तयेतद्धिशेषणावश्यकत्वादिति॥अत्रचेदंबोध्यम्॥यादृशीसिषाधयिषासत्वेसिद्धिसत्वेयल्लिङ्गकानुमिति
स्तादृशीसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तुल्लिङ्गकानुनिष्ठौपक्षता॥तेनसिद्धिपरामर्शसत्वेयत्किञ्चिज्ज्ञानंजायतामितीच्छा
च्छायामपिनानुमितिः॥वह्निव्याप्यधूमवान्पर्वतोवह्निमानितिप्रत्यक्षसत्वेप्रत्यक्षातिरिक्तंज्ञानंजायतामितीच्छायांतुअनुमितिर्भ

बत्येव॥एवंधूमपरामर्शसत्वेआलोकेनवन्हिमनुमिनियामितीच्छायामपिनानुमितिः॥सिषाधयिषाविरहकालेयादृशसिद्धिसत्वे
नानुमितिस्तादृशीसिद्धिर्विशिष्यतत्तदनुमितिप्रतिबन्धिकावक्तव्या॥तेनपर्वतस्तेजस्वीपाषाणमयोवन्हिमानितिज्ञानसत्वेप्यनु
मितेर्नविरोधः॥परन्तुपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धावपितद्वच्छेदेनानुमितेर्दर्शनात्पक्षतावच्छेदकावच्छेदेना
नुमितिप्रतिपक्षनावच्छेदकावच्छेदनसिद्धिरेवप्रतिबन्धिका॥पक्षतावच्छेदकेसामानाधिकरण्येनानुमितिप्रतितुसिद्धिमात्रंवि
रोधि॥इदन्तुबोध्यम्॥यत्रायंपुरुषोनवेतिसंशयानन्तरंपुरुषत्वव्याप्यकरचरणादिमानितिज्ञानंतत्रानुमित्सायामसत्यांपुरुष
त्वस्यप्रत्यक्षभवतिनत्वनुमितिरतोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्रीकामिनीजिज्ञासादिवत्त्वात्तत्रेणप्रति

अनैकान्तोविरुद्धश्चाप्यसिद्धःप्रतिपक्षितः॥कालात्ययापदिष्टश्चहेत्वाभासास्तुपंचधा॥७२॥

बन्धिका॥एवंपरामर्शानन्तरंविनाप्रत्यक्षेच्छांपक्षादिप्रत्यक्षानुत्पत्तेःप्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्य
क्षेप्रतिबन्धिकेतिसंक्षेपः॥हेत्वप्रसङ्गेनहेत्वाभासान्निरूपयति॥अनैकान्तइति॥तल्लक्षणंचयद्विषयकत्वेनज्ञानस्यानुमितिविरोधि
त्वंतत्त्वम्॥तथाहि॥व्यभिचारादिविषयकत्वेनज्ञानस्यानुमिति-विरोधित्वात्तेदोषाः॥यद्विषयकत्वंचयादृशविशिष्टविषयकत्व
बोध्यम्॥तेनवाधभ्रमस्यानुमितिविरोधित्वेपितत्रविशिष्टस्याप्रसिद्धत्वान्नहेतुदोषः॥नचयत्रवन्त्यभावव्याप्यपाषाणमयत्व
वानितिपरामर्शकालेवन्हिव्याप्यधूमस्याभासत्वंनस्यात्तत्रवन्त्यभावव्याप्यवान्यस्यइतिविशिष्टस्याप्रसिद्धत्वात्इतिवाच्य
म्॥दृष्टापत्तेरन्यथाबाधस्याप्यनित्यदोषत्वापत्तेः॥तस्मात्तत्रवन्ह्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकालेवन्हिव्याप्य

धूमस्यनाभासत्वम्॥भ्रमादनुमितिप्रतिबन्धमात्रम्॥हेतुस्त्वनदुष्टः॥इत्यन्वयसाध्याभाववद्वृत्तित्वादिकंदोषस्तद्वत्ताज्ञहेतौयेन
केनापिसम्बन्धेनेतिनव्याः॥परंतुयद्विषयकत्वेनज्ञानस्यानुमिति विरोधित्वंतद्वत्वंहेत्वाभासत्वम्॥सत्प्रतिपक्षादौविरोधिव्याप्या
दिकमेवतथातद्वत्वंचहेतौज्ञानरूपसम्बन्धेन॥नचैवंवह्निमान्धूमादित्यादौपक्षेबाधभ्रमस्यसाध्याभावविषयकस्यानुमितिविरोधि
त्वात्॥ज्ञानरूपसम्बन्धेनतद्वत्वस्यापिसत्वात्सद्धेतोरपिबाधितत्वापत्तिरितिवाच्यम्॥तत्रज्ञानस्यसंबन्धत्वाकल्पनादत्रसत्प्रति
पक्षितइतिव्यवहारेणतत्कल्पनात्तत्रबाधितव्यवहाराभावादित्याहुः॥अनुमितिविरोधित्वंचअनुमिति तत्कारणान्यतरविरो
धित्वम्॥तेनव्यभिचारिणिनाव्याप्तिः।दोषज्ञानंतुयद्धेतुविषयकंतद्धेतुकानुमितौप्रतिबन्धकंतेनैकहेतौव्यभिचारज्ञानेहेत्वन्तरे

आद्यःसाधारणस्तूस्याद्साधारणकोपरः॥तथैवानुपसंहारीत्रिधानैकान्तिकोभवेत्॥७३॥

णानुमित्युत्पत्तेस्तद्भावाद्यनवगाहित्वाच्चव्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेपिनक्षतिरितिसंक्षेपः।गादृशपक्षसाध्यहेतोया
वन्तोदोषास्तावदन्यान्यत्वम् तत्रहेत्वाभासत्वं॥पञ्चत्वकथनंतुतत्सम्भवस्थलाभिप्रायेण॥एवंसाधारणाद्यन्यतमत्वंअनैका
न्तिकत्वम्॥आद्यइति॥साधारणःसाध्यवदन्यवृत्तिःतेनचव्याप्तिज्ञानप्रतिबन्धःक्रियते॥असाधारणःसाध्यसमानाधिकरणः।तेनसा
ध्यसमानाधिकरण्यग्रहःप्रतिबध्यते।अन्येतुसपक्षावृत्तिरसाधारणः।सपक्षश्चनिश्चितसाध्यवान्। इत्यन्वयःशब्दोऽनित्यःशब्दत्वादि
त्यादौयदापक्षेसाध्यनिश्चयस्तदानासाधारण्यम्॥तत्रहेतोर्निश्चयादित्याहुः।अनुपसंहारीत्वात्यन्ताभावाप्रतियोगिसाध्यकादिः।अने
नचव्याप्तिरेकव्याप्तिग्रहप्रतिबन्धःक्रियते॥विरुद्धस्तुसाध्यव्यापकीभूताभावप्रतियोगी। अयंसाध्याभावग्रहसामग्रीत्वेनप्रतिबन्धकः॥

सत्प्रतिपक्षेतुप्रतिहेतुःसाध्याभावसाधकः।अत्रहेतुरेवेतिविशेषः॥साध्याभावसाधकएवसाध्यसाधकत्वेनोपन्यस्तइत्यशक्तिविशेषोऽन्या
यकत्वाच्चविशेषः।सत्प्रतिपक्षःसाध्याभावव्याप्यवान्पक्षः।अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वेनोपस्थितिकालीनतदभावव्याप्यवत्त्वे
नोपस्थितिविषयःस इत्यन्ये।अत्रचपरस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबन्धःफलम्। अत्रकेचित्॥घटाभावव्याप्य
वत्ताज्ञानेविद्यमानेपिघटचक्षुःसंयोगेसतिघटवत्ताज्ञानंजायते यथाचसत्यपिपीतत्वाभावव्याप्यशंखत्ववत्ताज्ञानेपिसतिपित्तादिदोषे
पीतःशंखइतिधीः।एवंकोटिद्वयव्याप्यदर्शनेपिकोटिद्वयस्यप्रत्यक्षरूपःसंशयोभवति। तथासत्प्रतिपक्षस्थलेसंशयरूपानुमितिर्भव
त्येव।यत्रचैककोटिव्याप्यदर्शनंतत्राधिकबलवत्तयातथाहितीयकोटिभानप्रतिबन्धान्नसंशयः।फलबलेनचाधिकबलसमबलभावः
कल्प्यतइत्याहुः।तन्न।तद्भावव्याप्यवत्ताज्ञानेसतितदुपनीतभानविशेषशाब्दबोधादेरनुदयात्। लौकिकसन्निकर्षजन्यदोषविशे
षाजन्यज्ञानमात्रेतस्यप्रतिबन्धकतालाघवात्॥नतूपनीतभानविशेषशाब्दबोधेचपृथक्प्रतिबन्धकतागौरवात्। तथाचप्रतिबन्ध
कसत्त्वात्कथमनुमितिः।नहिलौकिकसन्निकर्षस्थलेप्रत्यक्षमिवसत्प्रतिपक्षस्थलेसंशयाकारानुमितिप्रामाणिकी। येनानुमितिभिन्न
त्वेनापिविशेषणीयम्। यत्रचकोटिद्वयव्याप्यवत्ताज्ञानंतत्रोभयत्राप्रामाण्यज्ञानात्संशयोनान्यथा।अगृहीताप्रामाण्यकस्यैवविरोधि
ज्ञानस्यप्रतिबन्धकत्वादिति।असिद्धिस्तुआश्रयासिध्याद्यन्यतमः। आश्रयासिद्धिःपक्षेपक्षतावच्छेदकस्याभावः। यत्रकाञ्चनमयः
पर्वतोवह्निमानितिसाध्यतेतत्रपर्वतोनकाञ्चनमयइतिज्ञानेविद्यमानेकाञ्चनमयपर्वतेपरामर्शप्रतिबन्धःफलम्। स्वरूपासिद्धिस्तु
।पक्षेव्याप्यत्वाभिमतस्याभावः।अत्रचह्रदोद्रव्यंधूमादित्यादौपक्षेव्याप्यत्वाभिमतस्यहेतोरभावेज्ञातेपक्षव्याप्यहेतुमत्ताज्ञानरूप
स्यपरामर्शस्यप्रतिबन्धःफलम्।साध्यासिद्धिरपिव्याप्यत्वासिद्धिः।साध्येसाध्यतावच्छेदकाभावःसाध्यासिद्धिः।एतज्ज्ञानं

जातेचकाञ्चनमयवह्निमानित्यादौसाध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धःफलम्।एवंहेतौहेतुतावच्छेदकाभावःसाधनाप्र
सिद्धिः।यथाकाञ्चनमयधूमादित्यादौ।अत्रचहेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादेरभावःफलम्।एवंवह्निमा
न्नीलधूमादित्यादौगुरुत्वान्नीलधूमत्वस्यहेतुतानवच्छेदकत्वमपिव्याप्यत्वासिद्धिरित्यपिवदन्ति।बाध स्तूपसेसाध्यशून्यत्वम्॥
एतस्यचानुमितिप्रतिबन्धःफलम्॥तद्धर्मिकतद्भावनिश्चयोलौकिकसन्निकर्षजन्यदोषविशेषाजन्यतज्ज्ञानमात्रेविरोधी।नतुसंश
यसाधारणंपक्षेसाध्यसंसृष्टत्वज्ञानमनुमितिकारणम्॥तद्विरोधितयाचबाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमितियुक्तम्।पृथिव्यामि
तरभेदएतादृशनुमित्यनापत्तेः पूर्वपक्षेसाध्यसंसृष्टत्वज्ञानाभावात्तु अप्रसिद्धसाध्यकानुमित्यपलापापत्तेः।साध्यसंशयादि क
विनाप्यनुमित्युत्पत्तेश्च।एवंसाध्याभावज्ञानेप्रमात्वंज्ञानमपिनप्रतिबन्धकम्।प्रमाणाभावाद्गौरवाच्च।अन्यथासत्प्रतिपक्षादा
वपितद्भावव्याप्यवत्ताज्ञानेप्रमात्वविषयकत्वेनप्रतिबन्धकतापत्तेः।किन्तुभ्रमत्वज्ञानानास्कंदितबाधबुद्धेःप्रतिबन्धकता।तत्रभ्र
मत्वंशंकेविघटनेप्रामाण्यज्ञानंक्वचिदुपयुज्यते। नचबाधस्थलेपक्षेहेतुसत्त्वेव्यभिचारः।पक्षेहेत्वभावेस्वरूपासिद्धिरेवदोषइति
वाच्यम्॥बाधज्ञानस्यव्यभिचारज्ञानादेर्भेदात्॥किञ्च॥यत्रपरामर्शानन्तरबाधस्तत्रव्यभिचारज्ञानादेरकिञ्चित्करत्वात्।बाधस्या
नुमितिप्रतिबन्धकत्वंवाच्यम्॥एवंयत्रोत्पत्तिक्षणावच्छिन्नघटादेर्गन्धव्याप्यपृथिवीत्ववत्ताज्ञानंतत्रबाधस्यैवप्रतिबन्धकत्वंवा
च्यम्॥नचपक्षेघटेगन्धसत्त्वात्कथंबाधइतिवाच्यम्।पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादिति।सत्प्रति
पक्षतद्व्याप्यभिन्नायेयेहेत्वाभासास्तद्व्याप्योपितन्मध्यएवान्तर्भवंति।अन्यथाहेत्वाभासाधिक्यप्रसङ्गात्।बाधव्याप्यसत्प्रतिप
क्षोभिन्नएव।स्वतन्त्रेच्छेनमुनिनापृथगुपादानात्।सत्प्रतिपक्षव्याप्यस्तुनप्रतिबन्धकइतिप्रघट्टकाद्यैः॥ ॥ ॥ ॥

॥यःसपक्षेति॥सपक्षविपक्षवृत्तिःसाधारणइत्यर्थः।सपक्षःसाध्यवान्।विपक्षःसाध्यवद्भिन्नः।विरुद्धव्यभिचारिणोयसपक्षवृत्तित्वमुक्तम्
वस्तुतोविपक्षवृत्तित्वमेववाच्यम्॥विरुद्धस्यसाधारणत्वेपिदूषकताबीजस्यभिन्नतयातस्यपार्थक्यात्॥यस्तूभयस्मादित्यादि॥
सपक्षविपक्षव्यावृत्तइत्यर्थः।सपक्षःसाध्यवत्तयानिश्चितः।विपक्षःसाध्यशून्यतयानिश्चितः।शब्दोनित्यःशब्दत्वादित्यादौयद
शब्देनित्यत्वसन्देहस्तदासपक्षत्वंविपक्षतेचघटादीनामेव।तद्व्यावृत्तंचशब्दत्वमितितदानदसाधारणम्॥यदातुशब्देनित्य
त्वनिश्चयस्तदाना साधारणः॥इदंतुप्राचीनमतेन।नवीनमतन्तुपूर्वमुक्तम्।केवलान्वयिपक्षकइतिकेवलान्वयिधर्मावच्छिन्नपक्षक इ

यःसपक्षेविवक्षेचभवेत्साधारणस्तुसः॥यस्तूभयस्माद्व्यावृत्तःसत्वसाधारणोमतः॥७५॥तथैवानुपसंहारीकेवला
न्वयिपक्षकः॥यःसाध्यवतिनैवास्तिसविरुद्धउदीरितः॥७५॥अथाश्रयासिद्धिरादास्वरूपासिद्धिरप्यथ॥व्याप्यत्वासि
द्धिरपरास्यादसिद्धिरतस्त्रिधा॥७६॥पक्षासिद्धिर्यत्रपक्षोभवेन्मणिमयोगिरिः।ह्रदोद्रव्यधूमवत्त्वादत्रासिद्धिरथापरा॥७७॥
व्याप्यत्वासिद्धिरपरानीलधूमादिकेभवेत्॥यथा॥सर्वमभिधेयंप्रमेयत्वादित्यादौसर्वस्यैवपक्षत्वात्सामानाधिकरण्यग्रहेस्थलाभा
न्तराभावान्नानुमितिः।इदंतुनसम्यक्।पक्षैकदेशेसहचारग्रहेपिस्तेरभावात्॥अस्तुवासहचारग्रहस्तावताप्यज्ञानरूपासिद्धिरेव।न
तुहेत्वाभासत्वंतस्य॥तथापिकेवलान्वयिसाध्यकत्वंतत्वमित्युक्तम्॥यःसाध्यवतीति॥एवकारेणसाध्यवत्त्वावच्छेदेनहेत्वभावोबोधि
तस्तथाचसाध्यव्यापकीभूताभावप्रतियोगित्वंतदित्यर्थः।असिद्धिंविभजते।आश्रयासिद्धिरिति॥पक्षासिद्धिरिति।आश्रयासिद्धिरित्यर्थः
॥अपरेति॥स्वरूपासिद्धिरित्यर्थः॥नीलधूमादिकइति॥नीलधूमत्वंगुरुनयानहेतुतावच्छेदकम्॥समानाधिकरणव्याप्यतावच्छेदक

धूमप्रागभावत्वसंग्रहायसमानाधिकरणेति॥विरुद्धयोरिति॥कपिसंयोगकपिसंयोगाभावव्याप्यवत्तापरामर्शेपिनसत्प्रतिपक्षितत्वमतउक्तंविरुद्धयोरिति॥तथाचस्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयइत्यर्थः।साध्यशून्योयत्रेति॥पक्षेपक्षतावच्छेदकविशिष्टइत्यर्थः।तेनघटेगन्धसत्त्वेपिनक्षतिः।एवंमूलावच्छिन्नोवृक्षःकपिसंयोगीत्यत्रापिबोध्यम्॥॥उपमितिव्युत्पादयति॥ग्रामीणस्येति॥यत्रारण्यकेनकस्मैचिद्ग्रामीणायोक्तंगोसदृशोगवयपदवाच्यइतिपश्चाद्ग्रामीणेनक्वचिदरण्यादौगवयोदृष्टस्तत्रगोसादृश्यज्ञानंयज्जायतेतदुपमितिकरणंतदनन्तरंगोसदृशोगवयपदवाच्यइत्यतिदेशवाक्यार्थस्मरणंजायते

विरुद्धयोःपरामर्शोहेत्वोःसत्प्रतिपक्षता॥७८॥साध्यशून्योयत्रपक्षस्तुसौवाधउदाहृतः॥उत्पत्तिकालीनघटेगन्धादिर्यत्रसाध्यते॥७९॥ग्रामीणस्यप्रयुक्तःपश्चद्गोगवयादिकम्॥सादृश्यधीर्गवादीनांयास्यात्साकरणंमता॥८०॥वाक्यार्थस्यातिदेशस्यस्मृतिर्व्यापारउच्यते॥गवयादिपदानान्तुशक्तिधीरुपमाफलम्॥८१॥पदज्ञानन्तुकरणंद्वारंतत्रपदार्थधीः॥शाब्दबोधःफलंतस्यशक्तिधीःसहकारिणी॥८२॥

तेतदेवव्यापारस्तदनन्तरंतत्रगवयोगवयपदवाच्यइतिज्ञानंयज्जायतेतदुपमितिः।नत्वयंगवयपदवाच्यइत्युपमितिर्गवयान्तरेशक्तिग्रहाभावप्रसङ्गात्॥शाब्दबोधप्रकारंदर्शयति॥पदज्ञानमिति॥नतुज्ञायमानंपदंकरणम्।पदाभावेपिमौनिश्लोकादौशाब्दबोधात्॥पदार्थधीरिति॥पदजन्यपदार्थस्मरणंव्यापारः अन्यथापदज्ञानवतःप्रत्यक्षादिनापदार्थोपस्थितावपिशाब्दबोधापत्तेः॥अत्रापिवृत्त्यापदजन्यत्वंबोध्यम्॥अन्यथाघटादिपदात्समवायसम्बन्धेनाकाशस्मरणेजातेआकाशस्यापिशाब्दबोधापत्तेः। वृत्तिश्चशक्तिलक्षणान्यतरसम्बन्धः। अत्रैवशक्तिज्ञानस्योपयोगः। पूर्वंशक्तिग्रहाभावेप

२६

ज्ञानेपितत्सम्बन्धेनस्मरणानुपपत्तेः। पदज्ञानस्यहिसंबन्धिज्ञानविधयार्थस्मारकत्वम्॥ शक्तिश्चपदेनसहपदार्थेस्यसम्बन्धः। साचास्मा
च्छब्दादयमर्थोबोॅध्यइतीश्वरेच्छारूपा। आधुनिकेनाग्निशक्तिरस्त्येवैकादशेहनिपितानामकुर्यादितीश्वरेच्छायाः सत्वात्। आधुनिक
संकेतेतुनशक्तिरितिसंप्रदायः। नव्यास्तु॥ ईश्वरेच्छानशक्तिः किंत्विच्छैव। तेनाधुनिकसंकेतेपिशक्तिरस्तीत्याहुः। शक्तिग्रहस्तुव्या
करणादितः। तथाहि। शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च॥ वाक्यस्यशेषाद्विवृतेर्वदन्तिसान्निध्यतः सिद्धपद
स्यवृद्धाः॥ धातुप्रकृतिप्रत्ययादीनांशक्तिग्रहोव्याकरणाद्भवति॥ क्वचिच्चसतिबाधकेत्यज्यतेपि॥ यथावैव्याकरणैराख्यातस्य
कर्त्तरिशक्तिरुच्यते। चैत्रःपचतीत्यादौकर्त्रासहचैत्रस्याभेदान्वयस्तच्चगौरवात्यज्यतेकिन्तुरूढौशक्तिर्लाघवात्॥ रूढिश्चैवादौ
प्रकारीभूयभासते। नचकर्त्तुरनभिधानाच्चैत्रादिपदानन्तरंतृतीयास्यादितिवाच्यम्। कर्त्तृसंख्यानभिधानस्यतत्रतेन्वयात्। सं
ख्याभिधानयोग्यश्चकर्मत्वाद्यनवरुद्धःप्रथमान्तपदोपस्थाप्यः। कर्मत्वादीत्यस्यद्वितरविशेषणत्वतात्पर्यविषयत्वमर्थः। तेनचैत्रइव
मैत्रोगच्छतीत्यादौनचैत्रेसंख्यान्वयः। यत्रकर्मादौनविशेषणत्वेतात्पर्यंतद्वारणायप्रथमान्तेति। यद्वा। धात्वर्थोतिरिक्तविशेषणत्वेप्रथमद्
लार्थः। तेनचैत्रद्वयमैत्रोगच्छतीत्यादौ चैत्रादेर्वारणम्। स्तोकंपचतीत्यादौस्तोकादेर्वारणायचहितीयादलं। तस्यहितीयांतोपस्थाप्यत्वाद्वारणं
एवंव्यापारेपिनशक्तिर्गौरवात्। यौगच्छतीत्यादौव्यापारेआश्रयत्वेवालक्षणा। जानातीत्यादौतु आश्रयत्वेनप्रयोजकत्वेनवा लक्षणा।
ढलक्षणा॥ उपमानाद्यथाशक्तिग्रहस्तथोक्तम्। एवंकोशादपिशक्तिग्रहः। सतिबाधकेक्वचित्यज्यतेपि। यथानीलादिपदानांनीलरूपादौनी
लादिविशिष्टेचशक्तिः कोशेनव्युत्पादितातथापिलाघवान्नीलादौशक्तिःनीलादिविशिष्टतुलक्षणा। एवमाप्तवाक्यादपि यथालोकिक
लःपिकपदवाच्यइत्यादिशब्दात्पिकादिशब्देशक्तिग्रहः। एवंव्यवहारादपि। यथाप्रयोजकवृद्धेनघटमानयेत्युक्तेच्छुत्वाप्रयोज्यवृद्धे- २६

नघटआनीतस्तद्वधार्यपार्श्वस्थोबालोघटानयनरूपंकार्यंघटमानयेतिशब्दप्रयोज्यमित्यवधारयति।ततश्चघटंनयगामानयेत्यादिवाक्यादौआवापोद्वापाभ्यांघटादिपदानांकार्यान्वितघटादौशक्तिंगृह्णाति। इत्थञ्चभूतलेनीलोघटइत्यादिशब्दान्नशाब्दबोधः। घटादिपदानांकार्यान्वितघटादिबोधेसामर्थ्यावधारणात्। कार्यताबोधंप्रतिचलिङादीनांसामर्थ्यात्तद्भावान्नशाब्दबोधइतिकेचित्॥ तन्न। प्रथमतःकार्यान्वितघटादौशक्त्यवधारणेपिलाघवेनपश्चात्तस्यपरित्यागौचित्यात्॥अतएवचैत्रपुत्रस्तेजातःकन्यातेगर्भिणीत्यादौसुखप्रसादमुखम्लानिभ्यांसुखदुःखेअनुमायतत्कारणत्वेनपरिशेषाच्छाब्दबोधेनिर्णीयतद्धेतुकतयातंशब्दमवधारयति।तथाचव्यभिचारान्नकार्यान्वितेशक्तिः। नचतेत्रतंपश्येत्यादिकंशब्दान्तरमध्याहार्यम्॥मानाभावात्। चैत्रपुत्रस्तेजातोमृतश्चेत्यादौतदभावाच्च। इत्थञ्चलाघवादन्वितघटेपिशक्तिंत्यक्त्वाघटपदस्यघटमात्रेशक्तिमवधारयति। एवंवाक्यशेषादपिशक्तिग्रहः। यथायवमयश्चरुर्भवतीत्यत्रयवपदस्यदीर्घशूकविशेषेआर्याणांप्रयोगः। कंगौचमूच्छानाम्॥तत्रहियत्रान्याओषधयोम्लायन्ते। अथैतेमोदमानाइवोत्तिष्ठन्ति।वसन्तेसर्वसस्यानांजायतेपत्रशातनम्। मोदमानाश्चतिष्ठन्तियवाः कणिशशालिनइति। वाक्यशेषाद्दीर्घशूकेशक्तिर्निर्णीयते। कंगौतुशक्तिभ्रमात्प्रयोगः। नानाशक्तिकल्पनेगौरवात्। हरिपदादौतुविनिगमकाभावान्नानाशक्तिकल्पना। एवंविवरणादपिशक्तिग्रहः। विवरणन्तु तत्समानार्थकपदान्तरेणतदर्थकथनम्। यथाघटोस्तीत्यत्रकलशोस्तीत्यनेनविवरणाद्घटपदस्यकलशेशक्तिग्रहः॥ एवंपचतीत्यस्यपाकंकरोतीत्यनेनविवरणादाख्यातस्ययत्नार्थकत्वंकल्प्यते। एवंप्रसिद्धपदस्यसान्निध्यादपिशक्तिग्रहः। यथेहसहकारतरौमधुरंपिकोरौतीत्यादौपिकपदस्यशक्तिग्रहइति। तत्रजातावेवशक्तिर्नतुव्यक्तौ। व्यभिचारादानन्त्याच्च। शक्तिंविनाचजातिभानस्यासम्भवाद्व्यक्तेरपिभानमितिकेचित्। तन्न। शक्तिंविनाव्यक्तेर्भानानुपपत्तेः। नचव्यक्तौलक्षणा। अनुपपत्तिप्रतिसन्धानंविनापि

क्तिबोधात्। नचव्यक्तिशक्तावानन्त्यम्। सकलव्यक्तावेकस्याएवशक्तेःस्वीकारात्। नचाननुगमः गोत्वादेरेवानुगमकत्वात्। किञ्च। गौः शक्य इतिशक्तिग्रहोयदितदाव्यक्तौशक्तिः। यदितुगोत्वंशक्यमितिशक्तिग्रहस्तदागोत्वप्रकारकपदार्थस्मरणंशब्दबोधश्चनस्यात्॥समानप्रकारकत्वेनशक्तिज्ञानस्यपदार्थस्मरणंशाब्दबोधंप्रतिचहेतुत्वात्। किञ्च। गोत्वेयदिशक्तिस्तदागोत्वंशक्यतावच्छेदकंवाच्यम्। गोत्वत्वानुगवेतरासमवेतत्वेसतिसकलगोसमवेतत्वम्। तथाचगोव्यक्तीनांशक्यतावच्छेदकेऽनुप्रवेशात्तत्रैवगौरवम्॥तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्याकल्प्यमानाशक्तिर्जात्याकृतिविशिष्टव्यक्तौविश्राम्यतीति। शक्तंपदम्। क्वचिद्यौगिकंक्वचिद्रूढंक्वचिद्योगरूढम्। क्वचिद्यौगिकरूढम्। यत्रावयवार्थएवावबुध्यतेतद्यौगिकम्। यथापाचकादिपदम्। यत्रावयवशक्तिनैरपेक्षेणसमुदायशक्तिमात्रेणबुध्यतेतद्रूढम्॥ यथागोपदंमण्डपादिपदम्। यत्रत्ववयवशक्तिविषयेसमुदायशक्तिरप्यस्तितद्योगरूढम्॥ यथापङ्कजादिपदम्॥तथाहि॥पङ्कजपदमवयवशक्त्यापङ्कजनिकर्त्तृत्वरूपमर्थंबोधयति॥समुदायशक्त्याचपद्मत्वेनरूपेणपद्मंबोधयति॥नचैकेवलावयवशक्त्याकुमुदेप्रयोगःस्यादिति वाच्यम्॥रूढिज्ञानस्यकेवलयौगिकार्थप्रतिबन्धकत्वादितिप्राञ्चः॥वस्तुतस्तुसमुदायशक्त्युपस्थितपद्मैःवयवार्थपङ्कजनिकर्त्तुरन्वयोभवतिसान्निध्यात्। यत्ररूढ्यर्थस्यबाधःप्रतीयतेतत्रलक्षणयाकुमुदादेर्बोधः। यत्रतुकुमुदत्वेनरूपेणबोधेनतात्पर्यज्ञानंपद्मत्वस्यचबाधस्तत्रावयवशक्तिमात्रेणनिर्वाहदित्याहुः॥यत्रतुस्थलपद्मादावयवार्थबाधस्तत्रसमुदायशक्त्यापद्मत्वेनरूपेणबोधः। यदितुस्थलपद्मंविजातीयमेवतदालक्षणैव। यत्रतुयौगिकार्थरूढ्यर्थयोःस्वातन्त्र्येणबोधस्तद्यौगिकरूढम्। यथोद्भिदादिपदम्॥तत्रहिऊर्ध्वभेदैकर्तृतरुगुल्मादिरपिबुध्यतेयौगविशेषोपीति॥ ॥

॥----------॥ लक्षणाशक्यसम्बन्धेत्यादि॥ गङ्गायांघोषवत्यादौगङ्गापदस्यशक्यार्थप्रवाहरूपेघोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वायत्रप्रतिसन्धीयते। तत्रलक्षणयातीरस्यबोधः।सात्रशक्यसम्बन्धः॥तथाहि॥प्रवाहरूपशक्यार्थसम्बन्धस्यतीरेगृहीतत्वात्तीरस्यस्मरणंततः शाब्दबोधः॥परन्तुयद्यन्वयानुपपत्तिर्लक्षणाबीजस्यात्तदायष्टीःप्रवेशयेत्यत्रलक्षणानस्यात्। यष्टिषुप्रवेशान्वयस्यानुपपत्तेरभावात्। तेनप्रवेशेभोजनतात्पर्यानुपपत्त्यायष्टिधरेलक्षणा॥एवंकाकेभ्योदधिरक्षतामित्यादौकाकपदस्यदध्युपघातकेषुलक्षणा॥सर्वतोदधिरक्षायास्तात्पर्यविषयत्वात्॥एवंछत्रिणोयान्तीत्यादौछत्रिपदस्यैकसार्थवाहित्वेनलक्षणा। इयमेवाजहत्स्वार्थालक्षणोच्यते॥एकसार्थवाहित्वेनरूपेणछत्रितद्भावयोर्बोधात्॥ यदिचान्वयानुपपत्तिर्लक्षणाबीजस्यान्तदाकचि-

लक्षणाशक्यसम्बन्धस्तात्पर्यानुपपत्तितः॥

दङ्गापदस्यतीरेकविहोषपदस्यमत्स्यादौलक्षणेतिनियमोनस्यात्॥ इदन्तुबोध्यम्॥शक्यार्थसम्बन्धोयदितीरत्वेनरूपेणगृहीतस्तदातीरत्वेनतीरबोधः। यदितुगङ्गातीरत्वेनरूपेणगृहीतस्तदातेनैवरूपेणस्मरणम्॥ अतएवलक्ष्यतावच्छेदकेनलक्षणा॥तत्यकारकबोधस्यतत्रलक्षणांविनाप्युपपत्तेः।परन्त्वेवंक्रमेणशक्यतावच्छेदकेपिशक्तिर्नस्यात्॥तत्यकारकशक्यार्थस्मरणंप्रतितत्तत्पदस्यसामर्थ्यमित्यस्यसुवचत्वादितिविभावनीयम्॥ यत्रतुशक्यार्थस्यपरंपरासम्बन्धरूपालक्षणासालक्षितलक्षणेत्युच्यते। यथादूरेफादिपदेरेफहेयसम्बन्धोभ्रमरपदेज्ञायतेभ्रमरपदस्यसम्बन्धोभ्रमरेज्ञायतेतत्रलक्षितलक्षणा॥ किन्तुलाक्षणिकपदंनानुभाविकम्। लाक्षणिकार्थस्यशाब्दबोधेतुपदान्तरंकारणम्॥शक्तिलक्षणान्यतरसंबन्धेनेतरपदार्थान्वितस्वस्वशक्या

र्थशाब्दबोधंप्रतिपदानांसामर्थ्यविधारणात्॥ वाक्येतुशक्तेरभावाच्छक्यसम्बन्धरूपालक्षणापिनास्ति॥ यत्रगभीरायांनद्यांघोषइ-
त्युक्तंतत्रनदीपदस्यनदीतीरेलक्षणा। गभीरपदार्थस्यनद्यासहान्वयः। क्वचिदेकदेशान्वयस्यापिस्वीकारात्॥ यदित्वत्रैकदेशान्व
योनस्वीक्रियतेतदानदीपदस्यगभीरनदीतीरेलक्षणा। गभीरपदंतात्पर्यग्राहकम्। बहुव्रीहावप्येवम्॥ तत्रहिचित्रगुपदादौयथाएक
देशान्वयःस्वीक्रियते। तदागोपदस्यगोस्वामिनिलक्षणा। गविचित्राभेदान्वयः। यदित्वेकदेशान्वयोनस्वीक्रियतेतदागोपदस्यचि
त्रगोस्वामिनिलक्षणा। चित्रपदंतात्पर्यग्राहकं। एवमारूढवानरोवृक्षइत्यत्रवानरपदेवानरावेशकर्मणिलक्षणा। आरूढपदंचता
त्पर्यग्राहकम्॥ एवमन्यत्रापि॥ तत्पुरुषेतुपूर्वपदेलक्षणा॥ तथाहि॥ राजपुरुषादिपदेराजपदार्थेनपुरुषादिपदार्थस्यसाक्षान्वा
न्वयः। निपातानितिरिक्तनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्॥ अन्यथाराजापुरुषइत्यत्रापितथान्वयबोधःस्यात्। घटोनपटइ
त्यादौघटपटाभ्यांनञःसाक्षादेवान्वयान्निपातानितिरिक्तेति। नीलोघटइत्यादौनामार्थयोरभेदसम्बन्धेनान्वयाङ्गीकारेति॥ नचराजपु
रुषइत्यादौलुप्तविभक्तेःस्मरणंकल्प्यमितिवाच्यम्॥ अस्मृतविभक्तेरपितत्रबोधोदयात्। तस्माद्राजपदादौराजसम्बन्धिनिलक्ष
णा। तत्पुरुषेणसहाभेदान्वयः। द्वन्द्वेतुधवखदिरौछिन्धीत्यादौधवश्चखदिरश्चविभक्त्यर्थद्वित्वप्रकारेणबुध्यतेतत्रनलक्षणा॥न
चसाहित्येलक्षणेतिवाच्यम्। साहित्यशून्ययोरपिद्वन्द्वदर्शनात्। नचैकक्रियान्वयित्वरूपंसाहित्यमस्तीतिवाच्यम्। क्रियाभेदेपिधवख
दिरौछिन्धीपश्येत्यादौतद्दर्शनात्॥ साहित्यस्याननुभवाच्च। अतएवराजपुरोहितौसायुज्यकामौयजेयातामित्यत्रलक्षणाभावात्द्व
न्द्वआश्रीयते। तस्मात्साहित्यादिकंनार्थः किन्तुवास्तवोभेदोयत्रतत्रद्वन्द्वः। नचनीलघटयोरभेदइत्यादौकथमिति वाच्यम्। तत्रनी
लपदस्यनीलत्वंघटपदस्यघटत्वेलक्षणा। अभेदइत्यत्रचाश्रयाभेदइत्यर्थात्। समाहारद्वन्द्वेतुयदिसमाहारोप्यनुभूयत २८

दुच्यते॥ तदाऽहिनकुलमित्यादौपरपदेऽहिनकुलसमाहारेलक्षणापूर्वपदंतात्पर्यग्राहकम्॥ नचभेरीमृदङ्गंवादयेत्यत्रकथम्॥समाहारस्यापेक्षाबुद्धिविशेषरूपस्यवादनाअसम्भवादितिवाच्यम्॥ परम्परासम्बन्धेनतद्न्वयात्। एवंपञ्चपूलीत्यादावपि। परेतुअहिनकुलमित्यादावहिनेकुलस्यबुध्यतेप्रत्येकमेकत्वान्वयः।समाहारसंज्ञायाएकत्वंनपुंसकत्वंचप्राणितूर्यसेनाङ्गानामित्यादिसूत्रेणोक्तंतत्रैवअन्यत्रैकवचनमसाधित्याहुः। पितरौश्वशुरावित्यादौपितृपदेजनकदम्पत्योः श्वशुरपदेस्त्रीजनकदम्पत्योर्लक्षणा।एवमन्यत्रापि। घटादौतुनलक्षणा।घटत्वेनरूपेणनानाघटोपस्थितिसम्भवात्। कर्मधारयस्थलेतुनीलोत्पलमित्यादौअभेदसम्बन्धेननीलपदार्थउत्पलपदार्थप्रकारस्तत्रनलक्षणा। अतएवनिषादस्थपतिंयाजयेदित्यत्रनतत्पुरुषः।लक्षणापत्तेः।किन्तुकर्मधारयः। लक्षणाभावात्। नचनिषादस्यसंकरजातीयस्यवेदा

आसत्तिर्योग्यताकांक्षातात्पर्यज्ञानमिष्यते॥८३॥कारणंसन्निधानंतुपदस्यासत्तिरुच्यते॥

नधिकाराद्याजनासम्भवादितिवाच्यम्॥ निषादस्थविद्याप्रयुक्तेस्तत्रएवकल्पनीयत्वात्। लाघवेनमुख्यार्थान्वयेतदनुपपत्त्याकल्पनायाः फलमुखगोरवतयादोषत्वादिति॥ उपकुम्भमधेपिप्पलीत्यादौपरपदेतत्सम्बन्धिनिलक्षणा।पूर्वपदार्थप्रधानतयाचान्वयबोधइति। इत्थंसमासेनक्वापिशक्तिःपदशक्त्येवनिर्वाहादिति॥आसत्तिरित्यादि॥ आसत्तिज्ञानंयोग्यताज्ञानंआकांक्षाज्ञानंतात्पर्यज्ञानंचशाब्दबोधेकारणम्॥ आसत्तिपदार्थमाह॥ कारणमिति॥ सन्निधानंत्विति॥ अन्वयप्रतियोगिपदयोरव्यवधानमासत्तिस्तज्ज्ञानंशाब्दबोधेकारणम्॥ क्वचिद्व्यवहितेअव्यवधानभ्रमाच्छाब्दबोधइतिकेचित्॥ यत्पदार्थेनसहयत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः॥ शाब्दबोधेकारणम्॥ तेनगिरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावव्यवधानोपस्थित्यभावान्नशाब्दबोधः॥ नीलोघटोद्रव्यंपटइत्य

त्रासत्तिभ्रमाच्छाब्दबोधः। आसत्तिभ्रमेणशाब्दभ्रमाभावेपिनक्षतिः। ननुयत्रछत्रीकुण्डलीवासस्वीदेवदत्तइत्याद्युक्तंतत्रोत्तरपदस्मरणेनपूर्वपदस्मरणस्यनाशाद्व्यवधानेनतत्तत्पदस्मरणासम्भवइतिचेन्न॥ प्रत्येकपदानुभवजन्यसंस्कारस्मरन्तावह्निपदकस्मरणस्याव्यवधानेनोत्पत्तेः। नानासन्निकर्षैरेकप्रत्यक्षस्यैवनानासंस्कारैकस्मरणोत्पत्तेरपिसम्भवात्॥ तावत्पदसंस्कारसहितचरमवर्णज्ञानस्योद्बोधकत्वात्। कथमन्यथानानावर्णैरेकपदस्मरणम्॥ परन्तुनावत्पदार्थानांस्मरणादेकदैवखलेकपोतन्यायात्तावत्पदार्थानांक्रियाकर्मभावेनान्वयरूपःशाब्दबोधोभवतीतिकेचित्॥ वृद्धायुवानःशिशवःकपोताःखलेयथामीयुगपत्पतन्तिति॥ तथैवसर्वेयुगपत्पदार्थाःपरस्परेणान्वयिनोभवन्ति॥ परेतुयद्यदाकांक्षितंयोग्यंसन्निधानंप्रपद्यते॥ तेनतेनान्वितःस्वार्थःपदैरेवावगम्यते। तथाचखण्डवाक्यात्

पदार्थेतत्रतद्बुद्धायोग्यतापरिकीर्तिता॥ ८४॥

र्थबोधानन्तरंतथैवपदार्थस्मृत्यामहावाक्यार्थबोधइत्याहुः॥ एतेनतावद्गौणीभिव्यंग्यःपदार्थपदस्कोटोपिनिरस्तः। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेनतद्व्यञ्जकेनैवोपपत्तेरिति॥ इदन्तुबोध्यम्॥ यत्रह्वारमित्युक्तम्॥ तत्रापिधेह्यादिपदस्यज्ञानादेवबोधः। ननुपिधानाहिरूपार्थज्ञानात्। पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधेहेतुत्वात्। किञ्च। क्रियाकर्मपदानांतेनतेनैवसहसाकांक्षत्वात्तेनक्रियापदंविनाकथंबोधःस्यात्॥ तथापुष्पेभ्योद्ग्यादौस्पृहयतीत्यादिपदाध्याहारंविनाचतुर्थ्यनुपपत्तेः। पदाध्याहारआवश्यकः॥ योग्यतांनिर्वक्ति॥ पदार्थेत्यादिना॥ एकपदार्थेपरपदार्थसम्बन्धोयोग्यतेत्यर्थः। तज्ज्ञानाभावाच्चवह्निनासिंचतीत्यादौनशाब्दबोधः॥ नन्वेतस्यायोग्यतायाज्ञानंशाब्दबोधात्पाक्सर्वत्रनसम्भवति॥ वाक्यार्थस्यापूर्वत्वादितिचेन्न। तत्तत्पदार्थस्मरणेसतिक्वचित्संशयरूपस्यक्व

चिन्निश्चयरूपस्यापियोग्यतायाःज्ञानस्यसम्भवात्॥नव्यास्तुयोग्यताज्ञानंशाब्दबोधेनकारणम्।वह्निनासिंचतीत्यादौसेकेवह्निकरणत्वाभावरूपायोग्यतानिश्चयेनप्रतिबध्यान्नशाब्दबोधः।तदभावनिश्चयस्यलौकिकसन्निकर्षजन्यदोषविशेषाजन्यतज्ज्ञानमात्रेणप्रतिबंधकत्वाच्छाब्दबोधंप्रत्यपिप्रतिबन्धकत्वंसिद्धम्। योग्यताज्ञानविलम्बाच्चशाब्दबोधविलम्बोसिद्ध्इत्याहुः॥आकांक्षानिर्वक्ति।यत्पदेनेत्यादि॥येनपदेनविनायस्यपदस्यान्वयाननुभावकत्वंतेनसहतस्याकांक्षेत्यर्थः।क्रियापदंविनाकारकपदं——नान्वयबोधंजनयतीतितेनतस्याकांक्षा।वस्तुतस्तुक्रियाकारकपदानांसन्निधानमासत्याचरितार्थम्।परन्तुघटकर्मकताबोधंप्रतिघटपदोत्तरद्वितीयारूपाकांक्षाज्ञानंकारणंतेनघटःकर्मत्वमानयनंकृतिरित्यादौनशाब्दबोधः।अयमेतिपुत्रोराजःपुरुषोपसार्यतामित्यादौतुपुत्रेणसह

यत्पदेनविनान्यस्याननुभावकताभवेत्॥आकांक्षावक्तुरिच्छातुतात्पर्यंपरिकीर्तितम्॥८५॥

रा——यत्पदस्यतात्पर्यग्रहाभावान्नतेनान्वयबोधः॥पुरुषेणसहतात्पर्यग्रहेतुतेनसहान्वयबोधःस्यादेव॥तात्पर्यंनिर्वक्ति॥वक्तुरिच्छेति॥यदितात्——नंकारणंनस्यात्तदासैंधवमानयेत्यादौकचिदश्वस्यकचिल्लवणस्यबोधउत्तिनस्यात्।नचतात्पर्यग्राहकाणांप्रकरणादीनांशाब्दबोधकारणत्वमस्त्वितिवाच्यम्॥तेषामननुगमात्। तात्पर्यज्ञानजनकत्वेनतेषामनुगमेनुतात्पर्यज्ञानमेवलाघवात्कारणमस्तु॥इत्थंचवेदस्थलेपितात्पर्यज्ञानार्थमीश्वरःकल्प्यते॥नचतत्राध्यापकतात्पर्यज्ञानंकारणमितिवाच्यम्॥सर्गादावध्यापकाभावात्।नचप्रलयएवनास्तिकुतःसर्गादिरितिवाच्यम्॥प्रलयस्यागमप्रतिपाद्यत्वात्। इत्थंचशुकवाक्येपीश्वरीयतात्पर्यज्ञानंकारणम्। विसंवादिशुकवाक्यंतुशिक्षयापितुरेवतात्पर्यज्ञानंकारणम्॥ अन्येतुनानार्थादौकचिदेवतात्पर्यज्ञानंकारणम्॥तथाचशुकवाक्येविनैवतात्पर्यज्ञानं

शाब्दबोधः। वेदेत्व नादिमिमांसापरिशोधितैर्थावधारणमित्याहुः। पूर्वमनुभवस्मरणभेदाद्द्वैविध्यमुक्तम्। तत्रानुभवप्रकारादर्शितः। स्मृगमतयास्मरणंनदर्शितम्। तत्रहिपूर्वानुभवःकारणम्। अत्रकेचित्। अनुभवत्वेननकारणत्वंकिन्तुज्ञानत्वेन। अन्यथास्मरणोत्तरंस्मरणंनस्यात्। समानप्रकारकस्मरणेनपूर्वसंस्कारस्यविनष्टत्वात्। मन्मतेतुतेनैवस्मरणेनसंस्कारान्तरद्वारास्मरणोत्तरंजन्यतइत्याहुः। तन्न। यत्रसमूहालम्बनोत्तरंघटपटादीनांक्रमेणस्मरणमजनिष्टसकलविषयकस्मरणंनुमाभूत्तत्रफलस्यसंस्कारनाशकत्वाभावात्कालस्यहेतोश्चरमफलस्यवासंस्कारनाशकत्वंवाच्यम्। तथाचनक्रमिकस्मरणानुपपत्तिः। नचपुनःपुनःस्मरणाद्दृढतरसंस्कारानुपपत्तिः। इतिन्युद्धोधकसमवधानस्यदार्ढ्यपदार्थत्वात्। नचविनिगमनाविरहादेवज्ञानत्वेनापिजनकत्वं स्यादितिवाच्यम्। विशेषधर्मेण

साक्षात्कारेसुखादीनांकारणंमनउच्यतेअयौगपद्याज्ज्ञानानांतस्याणुत्वमपीष्यते॥८६॥

व्यभिचाराज्ञानेसामान्यधर्माणामन्यथासिद्धित्वात्। कथमन्यथादण्डस्यभ्रमिहेतोर्द्रव्यत्वेनरूपेणनकारणत्वम्। नचान्तरालिकस्मरणानांसंस्कारनाशकत्वसंशयाद्व्यभिचारसंशयइतिवाच्यम्॥ अनन्तसंस्कारतन्नाशकल्पनापेक्षयाचरमस्मरणस्यैवसंस्कारनाशकल्पनेनव्यभिचारसंशयाभावात्॥ इदानींक्रमप्राप्तंमनोनिरूपयति॥ साक्षात्कारेति॥ एतेनमनसिप्रमाणंदर्शितम्॥ तथाहि। सुखसाक्षात्कारःसकरणकः। जन्यसाक्षात्कारत्वात्। चाक्षुषसाक्षात्कारादिवदित्यनुमानेनमनसःकरणत्वंसिद्धम्॥ नचैवंदुःखादिसाक्षात्काराणामपिकरणान्तराणिस्युरितिवाच्यम्। लाघवादेकस्यैवसकलसाक्षात्कारकरणतयासिद्धेः। एवंसुखादीनामसमवायिकारणसंयोगाश्रयतयामनसःसिद्धिर्बोद्धव्या। मनसोऽणुत्वेप्रमाणमाह॥ अयौगपद्यादिति॥ ज्ञानानांचासुखरागादीनांयौगपद्यएककालोत्पत्तिर्नास्तीत्य

नुभवसिद्धम्॥ तत्रनानेंद्रियाणांसत्यपिविषयसन्निधानेयत्सम्बन्धादेकेंद्रियेणज्ञानमुत्पद्यतेतदसम्बन्धाच्चत्वगादिभिःपरैर्ज्ञानंनोत्पद्यते। तन्मनःविभुत्वेचासन्निधानंनसम्भवतीतिनविभुमनः। नचतदानीमदृष्टविशेषोह्येधकविलम्बादेवतज्ज्ञानविलम्बइतिवाच्यम्॥ तथासतिचक्षुरादीनामपिअकल्पनापत्तेः। नचदीर्घशष्कुलीभक्षणादौनानावधानभाजाभ्याचक्यमेकदानानेन्द्रियजज्ञानानीतिवाच्यम्॥ मनसोऽतिलाघवाद्भ्रमटितिनानेन्द्रियसंबन्धान्नानाज्ञानोत्पत्त्याउत्पलशतपत्रभेदादाविवयौगपद्यप्रत्ययस्यभ्रान्तत्वात्। नचमनसःसंकोचविकासशालित्वादुभयोत्पत्तिरस्तितिवाच्यम्॥ नानावयवतन्त्राशादिकल्पनेगौरवाल्लाघवान्निरवयवस्यैवाणुरूपस्यमनसःकल्पनादितिभावः॥ ॥इतिद्रव्यपदार्थव्याख्यासमाप्ता॥ ॥द्रव्यंनिरूप्यगुणान्निरूपयति॥ अथेति॥ ॥गुणत्वजातौकिमान

अथद्रव्याश्रितात्रेयानिर्गुणानिष्क्रियागुणाः॥ रूपंरसःस्पर्शोगन्धौपरत्वमपरत्वकम्॥८७॥ द्रवोगुरुत्वंस्नेहश्चेत्येगोमूर्तगुणा
अमी॥ धर्माधर्मौभावनाचशब्दोबुद्ध्यादयोपिच॥८८॥ }मितिचेत्। इदंद्रव्यैकमभिन्नसामान्यवतियापाकारणतासाकिञ्चिद्धर्मावच्छेद्या। निरवच्छेद्यकारणतायाअसम्भवात्। नहिरूपत्वादिकंसत्तावातत्रावच्छेदिकान्यूनाधिकदेशवृत्तित्वादतश्चतुर्विंशत्यनुगतंकिञ्चिद्धर्मावच्छेद्यमुपगन्तव्यंगुणत्वमिति॥ द्रव्याश्रिताइति॥ यद्यपिद्रव्याश्रितत्वंनलक्षणङ्गमादावतिव्याप्तेः। तथापिद्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्वन्तदर्थः भवतिहिगुणत्वन्द्रव्यत्वव्यापकतावच्छेदकन्तद्धर्मावच्छेदकंनजातिरितितद्धुदासः॥ निर्गुणाइति॥ यद्यपिनिर्गुणत्वङ्गमादावपि तथापिसामान्यवत्त्वसतिकर्मान्यत्वेचसतिनिर्गुणत्वम्बोध्यम्। जात्यादीनांनसामान्यवत्त्वङ्गमेनकर्मान्यत्वन्द्रव्यस्यननिर्गुणत्वमितितत्रग

तिव्याप्तिः॥ निष्क्रियाइति॥ स्वरूपकथनं नतुलक्षणम्। गगनादावतिव्याप्तेः॥ मूर्तगुणाइति। वेगेनस्थितिस्थापकोप्युपलक्षणीयः। अ
मूर्तेषुनवर्त्तन्तइत्यर्थः। अमूर्त्तेगुणाइति॥ मूर्तेषुनवर्तन्तइत्यर्थः॥ उभयेषामिति॥ मूर्तामूर्तेगुणाइत्यर्थः। संयोगविभागहित्वादीनिहि
वर्त्तीनित्रित्वचतुष्ट्वादिकन्त्रिचतुरादिवर्त्तीतिबोध्यम्॥ अतःशेषगुणाइति॥ रूपरसगन्धस्पर्शैकत्वपरिमाणैकपृथक्त्वपरत्वापरत्वबु
द्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाइत्यर्थः॥ बुद्ध्यादीति॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाइत्यर्थः। स्पर्श

एतेःमूर्तगुणाःसर्वेविद्वद्भिःपरिकीर्तिताः॥ सङ्ख्यादयोविभागान्त उभयेषाङ्गुणामत ः॥८९॥ संयोगश्चविभागश्चसंख्यादि
त्वादिकानथा॥ द्विपृथक्त्वादयस्तद्वदेतेःनेकाश्रितागुणाः॥९०॥ अतःशेषगुणाःसर्वेमताएकैकवृत्तयः॥ बुद्ध्यादिषट्कंस्पर्श
न्ताःस्नेहःसांसिद्धिकोद्रवः॥९१॥ अदृष्टभावनाशब्दाअमीवैशेषिकागुणाः॥ संख्यादिरपरत्वान्तोद्रवोनैमित्तिकस्तथा॥९२॥
गुरुत्ववेगौसामान्यगुणाएतेप्रकीर्तिताः॥ सङ्ख्यादिरपरत्वान्तोद्रवत्वंस्नेहएवच॥९३॥ एतेतुद्वीन्द्रियग्राह्याअथस्पर्शा
न्तशब्दकाः॥ बाह्यैकैकेन्द्रियग्राह्यागुरुत्वादृष्टभावनाः॥९४॥ अतीन्द्रियाविभूनान्तुयेस्युर्वैशेषिकागुणाः॥ अकारणगुणा
स्तन्नाएतेतुपरिकीर्तिताः॥९५॥ }} न्ताइति। रूपरसगन्धस्पर्शाइत्यर्थः। द्रवोद्रवत्वं। वैशेषिकाइति। विशेषाएववैशेषिकाः स्वार्थे
ठक्। विशेषगुणाइत्यर्थः॥ संख्यादिरिति॥ संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः॥ द्वीन्द्रियेति॥ चक्षु॰। त्वचापि
ग्रहणयोग्यत्वात्॥ बाह्येति। रूपादीनाञ्चक्षुरादिग्राह्यत्वात्॥ विभूनामिति॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दाइ
त्यर्थः॥ अकारणेति॥ अकारणगुणनकार्येयेगुणाउत्पद्यन्तेतेकारणगुणपूर्वकारूपादयोवक्ष्यन्ते॥ ७ ॥ ७ ॥ ७ ॥ ॥ ३१

बुध्यादयस्तूनतादृशाः आत्मादेःकारणाभावात्॥ पाकजरूपादीनांकारणगुणपूर्वकत्वाभावादपाकजादित्कत्कम्। तथाविधमपाकजम् न थैकत्वमपिबोध्यम्।स्पष्टम्।कर्मजन्यत्वंयद्यपिनसाधर्म्यंघटादावतिव्याप्तेःसंयोगजसंयोगेःव्याप्तेश्च।तथापिकर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्वम्बोध्यम्।एवमन्यत्राप्यूह्यम्।पृथक्त्वेत्यत्रत्वप्रत्ययस्यप्रत्येकमन्वयादेकत्वम्पृथक्त्वञ्चगृह्यम्। पृथक्त्वपदेनचैकपृथक्त्वं --विवक्षितम्॥ भवेदसमवायित्वमिति॥ घटादिरूपरसगन्धस्पर्शाःकपालादिरूपरसगन्धस्पर्शेभ्योभवन्तिएवंकपालादिपरिमाणादीनांघटादिपरिमाणाद्यसमवायिकारणत्वम्। शब्दस्यापिहितीयशब्दस्मृतिएवंस्थितिस्थापकैकपृथक्त्वयोरपिज्ञेयम्॥ निमित्तत्वमिति

अपाकजास्तुस्पर्शान्ताद्रवत्वंचतथाविधम्॥ स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं९६।स्थितिस्थापकइत्येतेस्युःकारणगुणोद्भवाः॥संयोगश्चविभागश्चवेगश्चैतेतुकर्मजाः॥९७॥स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दकं॥ भवेदसमवायित्वमथवैशेषिकेगुणे॥९८॥आत्मनःस्यान्निमित्तत्वमुष्णस्पर्शगुरुत्वयोः॥ वेगेपिचद्रवत्वेचसंयोगादिद्वयेनथा॥ ९९॥ द्विधैकारणत्वंस्यादथप्रादेशिकोभवेत्॥ वैशेषिकोविभुगुणःसंयोगादिद्वयन्तथा॥१००॥

बुध्यादीनामिच्छादिनिमित्तत्वादितिभावः। हेतुतादृयमिति। असमवायिकारणत्वंनिमित्तकारणत्वञ्च॥तथाहि।उष्णस्पर्शःउष्णस्पर्शस्यासमवायिकारणम्। पाकजेनिमित्तम्। गुरुत्वंगुरुत्वपतनयोरसमवायिकारण मभिघातेनिमित्तम्। वेगोवेगस्यन्दयोरसमवायि।अभिघातेनिमित्तम्। द्रवत्वन्द्रवत्वस्यन्दनयोरसमवायि॥ संग्रहेनिमित्तम्भेरीदण्डसयोगः शब्देनिमित्तम्भेर्याकाशसंयोगोःसमवायीवंशदलद्वयविभागः शब्देनिमित्तंवंशदलाकाशविभागोःसमवायीइति॥द्विधेति॥ प्रादेशिकः।अव्याप्यवृत्तिः॥ ७ ॥ ७ ॥

॥चक्षुरिति॥रूपत्वजातिस्तुप्रत्यक्षसिद्धा॥रूपशब्दोल्लेखिनीप्रतीतिर्नास्तीतिचेन्मास्तुरूपशब्दप्रयोगः।तथापिनीलपीतादिष्वनुगतजाति
विशेषोऽनुभवसिद्धएव।रूपशब्दाप्रयोगेपिनीलोवर्णःपीतोवर्णइतिवर्णशब्दोल्लेखिनीप्रतीतिरस्त्येव॥एवंनीलत्वादिकमपिप्रत्यक्षसि
द्धम्।नचैकैकाएवनीलारुणादिव्यक्तयइत्येकव्यक्तित्वान्नीलत्वादिकंनजातिरितिवाच्यम्।नीलोनष्टोरक्तउत्पन्नइत्यादिप्रतीतेर्नी
लादेरुत्पादविनाशशालितयानानात्वात्॥अन्यथा एकनीलनाशेजगदनीलतामापद्येत।नचनीलसमवायरक्तसमवाययोरेवोत्पाद
विनाशविषयकोऽसौप्रत्ययइतिवाच्यम्॥प्रतीत्यासमवायानुल्लेखात्।नचसएवायंनीलइतिप्रत्यक्षवल्लाघवाच्चैक्यमितिवाच्यम्॥
प्रत्यक्षस्यतज्जातीयविषयत्वात्।सैवेयंगुर्ज्जरीतिवत्॥लाघवन्तुप्रत्यक्षबाधितम्।अन्यथापटादीनामप्येक्यप्रसंगात्।उत्पादवि

चक्षुर्ग्राह्यंभवेद्रूपंद्रव्यादेरुपलम्भकम्॥चक्षुषःसहकारिस्याच्छुक्लादिकमनेकधा॥१०१॥

नाशबुद्धेःसमवायालम्बनत्वापत्तेरिति एतेनरसादिकमपिव्याख्यातम्।चक्षुर्ग्राह्यमिति॥चक्षुर्ग्राह्यविशेषगुणइत्यर्थः।एवमग्रेपि।द्र
व्यादेरितिउपलम्भकमुपलब्धिकारणम्।इदमेवविवृणोति।चक्षुषइति।द्रव्यगुणकर्मसामान्यानांचाक्षुषप्रत्यक्षंप्रतिउद्भूतरूपकारण
म्।शुक्लादिकमनेकधेति।तच्चरूपंशुक्लनीलपीतरक्तहरितकर्बुरादिभेदादनेकप्रकारकंभवति॥ननुकथंकर्बुरमतिरिक्तंरूपंभवति इ
त्यंनीलपीतावयवारब्धोऽवयवीनतावन्निरूपोऽप्रत्यक्षप्रसंगात्।नापिव्याप्यवृत्तीनीलादिकंरूपमुत्पद्यते।पीतावच्छेदेनापि
नीलोपलब्धिप्रसंगात्।नाप्यव्याप्यवृत्तिनीलादिकमुत्पद्यते।व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वेविरोधात्।तस्मान्नाना
जातीयरूपैरवयविनिविजातीयंचित्ररूपमारभ्यते॥अतएवैकस्मिंश्चित्ररूपेनुभवोपिनानारूपकल्पनेगौरवात्।इत्थंचनीलादीनांपी

तावारम्भेप्रतिबन्धकत्वकल्पनात्॥अवयविनिपीतावयवप्राप्तिः एतेनस्पर्शोपिव्याख्यातः॥रसादिकमपिनाव्याप्यवृत्तिः।किन्तुनानाजातीयरस
वद्वयवैरारब्धेवयविनिरसाभावेपिनक्षतिः।नत्वरसनयावयवरसएवगृह्यतेरसनेन्द्रियादीनांद्रव्यग्रहेसामर्थ्याभावात्॥अवयविनोनीर
सत्वेपिक्षतेरभावात्॥नव्याप्यवृत्त्येवनानारूपम्॥नीलादेःपीतादिप्रतिबन्धकत्वकल्पनेगौरवात्॥अतएवलोहितोयस्तूर्ण
नमुरवेपुच्छेचपाण्डुरः॥श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यतेइत्यादिशास्त्रमप्युपपद्यते।नचव्याप्याव्याप्यवृत्तिजातीयहयोर्विरो
धः॥मानाभावात्।नचलाघवादेकरूपम्।अनुभवविरोधात्।अन्यथाघटादेरपिलाघवादैक्यस्यात्॥एतेनस्पर्शादिकमपिव्याख्यातम्

जलादिपरमाणौतन्नित्यमन्यत्सहेतुकम्॥रसस्तूरसनाग्राह्योमधुरादिरनेकधा॥१०२॥सहकारीरसज्ञायानित्यनादिश्चपूर्ववत्
घ्राणग्राह्योभवेद्गन्धोघ्राणस्यैवोपकारकः॥१०३॥सौरभश्चासौरभश्चसद्वैधापरिकीर्तितः॥स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचःस्यादुप
कारकः॥१०४॥अनुष्णाशीतस्पर्शोतोष्णभेदात्स्यत्रिविधोमतः॥

॥तिवदन्ति।जलादी
नि॥जलपरमाणौतेजःपरमाणौचरूपंनित्यम्।पृथिवीपरमाणुरूपन्तुननित्यम्।तत्रपाकेनरूपांतरोत्पत्तेः।नहिघटस्यपाकानन्तरंतदवयवो
ःपक्वउपलभ्यते।नहिरक्तकपालस्यकपालिकानीलावयवाभवति।एवक्रमेणपरमाणावपिपाकसिद्धेःअन्यत्जलतेजःपरमाणुरूपभिन्न
रूपम्।सहेतुकम्।जन्यम्।रसन्निरूपयति।रसस्त्विति॥रासनज्ञानेरसःकारणमित्यर्थः।पूर्ववदिति।जलपरमाणौरसोनित्यः अन्यःसर्वोपि
रसोनित्यइत्यर्थः।गन्धंनिरूपयति।घ्राणग्राह्येति।उपकारकइति।घ्राणजन्यज्ञानेसहकारीसइत्यर्थः।सर्वोपिगन्धोनित्यएव।स्पर्शंनिरूपयति। स्पर्श
इति।उपकारकइतिस्पर्शनप्रत्यक्षेस्पर्शकारणमित्यर्थः।अनुष्णाशीतइतिपृथिव्यांवायौचस्पर्शः।अनुष्णाशीतःजलेशीतःतेजस्युष्णः॥

॥काठिन्येति॥ कठिनसूक्ष्मकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः। कठिनत्वादिकन्तु संयोगगतो जातिविशेषः। चक्षुर्ग्राह्यत्वापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणुस्पर्शौ नित्यास्तद्भिन्नास्त्वनित्यादित्यर्थः। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्यां हि रूपरसगन्धस्पर्शपरावत्तिरग्निसंयोगादुपलभ्यते। नहि शतधाध्मायमानेजले रूपादिकं परिवर्तते। नीरसौरभ्यौष्ण्यद्रव्यान्वयव्यतिरेकाभ्यामोपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पार्थिवेष्वपि मध्यपरमाणावेव रूपादीनां पाकवृत्तिं वैशेषिका वदन्ति तेषामयमाशयः। अवयविनाशेष्ववयवेषु पाकेनसम्भवति॥ परन्तुवह्निसंयोगेनावयविषुविनष्टेषुस्वतन्त्रेषुपरमाणुषुपाकः। पुनश्चपक्वपरमाणुसंयोगाद्द्व्यणकादिक्रमेणपुनर्महावयविपर्यन्तमुत्पत्तिः। तेजसामतिशयितवेगवशात्पूर्वव्यूहनाशेनोत्तरव्यूहान्तरोत्पत्तिश्चेति। अथद्व्यणकादिविनाशः

काठिन्यादिस्थितावेवनित्यतादित्वपूर्ववत्॥५॥एतेषांपाकजत्वन्तुस्थितौनान्यत्रकुत्रचित्॥तत्रापिपरमाणौस्यात्पाकोवैशेषिकेनये॥१०६॥

मारभ्यकतिभिःक्षणैःपुनरुत्पत्स्यारूपादिमद्भवतीतिशिष्यबुद्धिवैशद्यायक्षणप्रक्रियातत्रविभागजविभागानङ्गीकारेनक्षणा तदङ्गीकारेतुविभागःकिञ्चित्संयोगविभागञ्जनयेत्॥निरपेक्षस्यतत्त्वकर्मत्वंस्यात्॥संयोगविभागयोरनपेक्षं कारणंकर्मेतिहिवैशेषिकं सूत्रम्॥स्वोत्तरोत्पन्नभावानपेक्षत्वन्तस्यार्थः। अन्यथाकर्मणोप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणाद्व्याप्तिःस्यात्॥तत्रयदिद्व्यारम्भकसंयोगविनाशविशिष्टकालमपेक्ष्यविभागजविभागः स्यात्तदादशक्षणा। अथद्रव्यनाशविशिष्टकालमपेक्ष्यविभागजविभागः स्यात्तदैकादशक्षणा। तथाहि। अथनवक्षणा। वह्निसंयोगात्परमाणौकर्मततःपरमाण्वन्तरेणविभागःततआरम्भकसंयोगनाशः। ततोद्व्यणकनाशः॥१॥ततःपरमाणौश्यामादिनाशः॥२॥ततोरक्तादयुत्पत्तिः३ ततोद्रव्यारम्भानुगुणाक्रिया४ ततोविभागः५ ततःपूर्वसंयो

गनाशः ६ ततआरम्भकसंयोगः ७ ततोद्व्यणुकोत्पत्तिः ८ ततोरूपाद्युत्पत्तिः ९ इतिनवक्षणा। ननुश्यामादिनाशक्षणेरक्तोत्पत्तिक्षणेवापर माणोर्द्रव्यारम्भानुगुणाक्रिया। स्त्विति चेन्न। अग्निसंयुक्तेपरमाणौयत्कर्मतद्धिनाशमन्तरेणगुणोत्पत्तिमन्तरेणचपरमाणोक्रियान्तराभा वात्। कर्मवतिकर्मान्तरानुत्पत्तेः॥ निर्गुणेद्रव्येद्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापिपरमाणौश्यामादिनिवृत्तिसमकालेरक्ताद्युत्पत्तिः स्यादिति चेन्न। पूर्वरूपादिध्वंसस्यापिरूपान्तरेहेतुत्वात्। अथदृश्यक्षणा।सचारम्भकसंयोगविनाशविशिष्टकालमपेक्ष्यविभागेनविभा गजननेसतिस्यात्। तथाहि वन्हिसंयोगाद्व्यणुकारम्भकेपरमाणौकर्मततोविभागः। ततआरम्भकसंयोगनाशः॥ ततोद्व्यणुकनाशविभा गजविभागौ १ ततःश्यामनाशपूर्वसंयोगनाशौ २ ततोरक्तोत्पत्त्युत्तरसंयोगौ ३ ततोवन्हिनोदनजन्यपरमाणुकर्मणोनाशः ४ ततोऽदृष्टवद्वा त्मसंयोगाद्द्रव्यारम्भानुगुणाक्रिया ५ ततोविभागः ६ ततश्चपूर्वसंयोगनाशः ७ ततआरम्भकसंयोगः ८ ततोद्व्यणुकोत्पत्तिः ९ अथरक्तो त्पत्तिः १०॥ अथैकादशक्षणा॥ वन्हिसंयोगात्परमाणौकर्म ततोविभागः। ततोद्रव्यारम्भकसंयोगनाशः। ततोद्व्यणुकनाशः १ ततोद्व्यणुक नाशविशिष्टकालमपेक्ष्यविभागजविभागश्यामनाशौ २ ततःपूर्वसंयोगनाशरक्तोत्पत्ती ३ ततउत्तरदेशसंयोगः। ४। ततोवन्हिनोदनजन्य परमाणौकर्मनाशः। ५। ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणाक्रिया ६ ततोविभागः ७ ततःपूर्वसंयोगनाशः ८ ततोद्रव्यारम्भकोत्तरसं योगः ९ ततोद्व्यणुकोत्पत्तिः १०। ततोरक्ताद्युत्पत्तिः॥ ११॥ मध्यशब्दवदेकस्मादग्निसंयोगान्नरूपनाशोत्पादौ॥ तावत्कालमेकस्याग्नेरस्थि रत्वात्॥ किञ्चयदिनाशकएवोत्पादकस्तदानष्टेरूपादावग्निनाशेनीरूपश्चिरंपरमाणुस्यात्॥ उत्पादकश्चेन्नाशकस्तदारक्तोत्पत्तौतद ग्निर्नाशेरक्ततरतानस्यात्॥ अथपरमाण्वन्तरेकर्मचिन्तनात्पञ्चमादिक्षणेपिगुणोत्पत्तिः। तथाहिएकत्रपरमाणौकर्म ततोविभागः। तत आरम्भकसंयोगनाशपरमाण्वन्तरकर्मणी ततोद्व्यणुकनाशःपरमाण्वन्तरकर्मजन्यविभागइत्येकःकालः १ ततःश्यामादिनाशोविभागाच्च

पूर्वसंयोगनाशश्चेत्येकःकालः २ ततोरक्तोत्पत्तिर्द्रव्यारम्भकसंयोगइत्येकःकालः। ३। अथद्व्यणुकोत्पत्तिः ४ ततोरक्तोत्पत्तिरिति ५
पञ्चक्षणा। द्रव्यनाशसमकालंपरमाण्वन्तरेकर्मचिन्तनात्। षष्ठेद्व्यणुकोत्पत्तिः। तथाहि। परमाणुकर्मणापरमाण्वन्तरविभागः। ततआर
म्भकसंयोगनाशः॥ ततोद्व्यणुकनाशपरमाण्वन्तरकर्मणी। अथश्यामादिनाशः। परमाण्वन्तरेकर्मजोविभागश्च २ ततोरक्तोत्पत्तिःपर
माण्वन्तरेपूर्वसंयोगनाशश्च ३ ततःपरमण्वंन्तरसंयोगः॥४॥ततोद्व्यणुकोत्पत्तिः ५ अथरक्तोत्पत्तिः। ६। ---------एवंश्यामनाश
क्षणेपरमाण्वन्तरेकर्मचिन्तनात्सप्तक्षणा। तथाहि। परमाणोकर्मततः परमाण्वन्तरेणविभागः। ततआरम्भकसंयोगनाशः। ततोद्व्यणुकना
शः १ ततःश्यामादिनाशपरमाण्वन्तरकर्मणी २ ततोरक्तोत्पत्तिः परमाण्वन्तरेकर्मजविभागश्च ३ ततः परमाण्वन्तरेणपूर्वसंयोगनाशः। ४

नैयायिकानान्तुनयेद्व्यणुकादावपीष्यते॥

ततःपरमाण्वन्तरेणसंयोगः। ५। ततोद्व्यणुकोत्पत्तिः। ६॥ ततोरक्तोत्पत्तिरिति॥ ७॥ एवंरक्तोत्पत्तिसमकालंपरमाण्वन्तरेकर्मचिन्तनाद्दृष्टक्ष
णा॥ तथाहि॥ परमाणोकर्म ततःपरमाण्वन्तरविभागः ततआरम्भकसंयोगनाशः ततोद्व्यणुकनाशः १ ततःश्यामनाशः। २। ततोरक्तोत्पत्तिप
रमाण्वन्तरकर्मणी ३ ततःपरमाण्वन्तरकर्मजविभागः ४ ततःपूर्वसंयोगनाशः ५ ततःपरमाण्वन्तरसंयोगः ६ ततोद्व्यणुकोत्पत्तिः ७ अथर
क्तोत्पत्तिरित्यष्टक्षणा। नैयायिकानांमतेद्व्यणुकादाववयविन्यपिपाकोभवति। तेषामयमाशयः अवयविनांसच्छिद्रत्वाद्दन्द्वैः सूक्ष्मावय
वैरन्तः प्रविष्टैरवयवेष्ववष्टब्धेष्वपिपाकोनविरुध्यतेनैयायिकानामिति॥ नैयायिकानांमतेद्व्यणुकादौअवयविन्यपिपाकोभवति। तेषामय
माशयःअवयविनांसच्छिद्रत्वाद्दन्द्वैः सूक्ष्मावयवैरंतःप्रविष्टैरवयवेष्ववष्टब्धेष्वपि। पाकोनविरुध्यतेवैशेषिकमते। अनन्तावयवितन्नाश

इत्यन्वयसोयंघटइत्यादौप्रत्यभिज्ञापिसंगच्छतेयत्रतुनप्रत्यभिज्ञातत्रावयविनाशोपिस्वीक्रियतइति। संख्यांनिरूपयितुमाह॥गणनेति॥
गणनव्यवहारासाधारणकारणंसंख्येत्यर्थः॥नित्येष्विति॥नित्येषुपरमाण्वादिषुएकत्वंनित्यम्॥अनित्येघटादावेकत्वमनित्यमित्यर्थः॥
द्वित्वादयोव्याप्यवृत्तिसंख्याअपेक्षाबुद्धिजन्याः।अनेकेति। यद्यपिद्वित्वादिसमवायःप्रत्येकंघटादावपिवर्तते॥तथापिएकोद्वावितिप्रत्य
याभावान्॥एकोनद्वाविति प्रत्ययप्रसङ्गाच्च॥द्वित्वादीनाम्यर्थोभिलक्षणः कश्चित्सम्बन्धोभेकाश्रयोभ्युपेयते॥अपेक्षाबुद्धिनाशादिति
प्रथममपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः।ततोविशेषणज्ञानंद्वित्वत्वनिर्विकल्पात्मकम्॥ततोद्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च।त
तोद्वित्वनाशइति।यद्यपिज्ञानानांद्वित्वंक्षणमात्रस्थायित्वम्। योग्यविभुविशेषगुणानोत्वोत्तरवृत्तिगुणनाश्यत्वात्॥तथाप्यपेक्षाबुद्धेस्त्रिक्षणा

गणनाव्यवहारेतुहेतुःसंख्याभिधीयते॥१०७॥नित्येषुनित्यमेकत्वमनित्येनित्यमिष्यते॥द्वित्वादयःपरार्द्धान्ता
अपेक्षाबुद्धिजामताः॥१०८॥अनेकाश्रयपर्याप्ताएतेतुपरिकीर्तिताः॥अपेक्षाबुद्धिनाशाच्चतेषांनाशोनिरूपितः॥१०९॥

दस्थायित्वंकल्प्यते। अन्यथानिर्विकल्पककालेपेक्षाबुद्धिनाशानन्तरंद्वित्वस्यैवनाशःस्यात्। ननुद्वित्वप्रत्यक्षम्॥तदानींविषयाभावाद्वित्व
मानस्यैवचक्षुरादिनाज्ञानजननोपगमात्॥तस्माद्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकंकल्प्यते।नचापेक्षाबुद्धिनाशात्कथंद्वित्वनाशइति=
वाच्यम्। कालान्तरेद्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धिस्तदुत्पादिकातन्नाशान्नाशइतिकल्पनात्।अतएवतत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वा
दिकंतेनैवगृह्यतइतिकल्प्यते।नचापेक्षाबुद्धेर्द्वित्वप्रत्यक्षेकारणत्वमस्तीतिवाच्यम्।लाघवेनद्वित्वप्रत्येवकारणत्वस्यैवोचितत्वात्।अतोन्द्रि
येह्यणुकादावपेक्षाबुद्धिर्योगिनाम्॥सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिः।ब्रह्माण्डान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वाद्वित्वादिका

अपेक्षाबुद्धिः केत्यतआह ॥ अनेकेति॥ अयमेकोऽयमेकइत्याकारिकेत्यर्थः॥ इदन्तुबोध्यम्। यत्रानियतैकत्वज्ञानन्तत्रित्वादिभिन्नाबहुत्वसंख्योत्पद्यते। यथासेनावनादाविति कन्दलीकारः। आचार्यास्तु त्रित्वादिकमेवबहुत्वमन्यन्ते। तथाचत्रित्वत्वादिव्यापिकाबहुत्वत्वजातिर्नातिरिच्यते। सेनावनादावुत्पन्नेपित्रित्वादौत्रित्वत्वाद्यग्रहोदोषात्॥ इत्यन्नेतोबहुनरयंसेनेतिप्रतीतिरुपपद्यते। बहुत्वस्यसंख्यान्तरत्वेतुतन्नारतम्याभावान्नोपपद्यदित्यवधेयम्। परिमाणं निरूपयति॥ परिमाणमिति॥ परिमितिव्यवहारासाधारणंकारणंपरिमाणमित्यर्थः। तच्चतुर्विधम्। अणुमहद्दीर्घह्रस्वञ्चेति। इदंचानुविध्यंप्रत्यक्षसिद्धम्। तत्राणुत्वह्रस्वत्वेमहत्वदीर्घत्वेचसमनियते। तत्परि

अनेकैकत्वबुद्धिर्यासापेक्षाबुद्धिरिष्यते॥ परिमाणंभवेन्मानव्यवहारस्यकारणम्॥११०॥ अणुदीर्घंमहद्ह्रस्वमितितद्वेदईरितः॥ अनित्येतदनित्येस्यान्नित्येनित्यमिहेष्यते॥१११॥ संख्यातःपरिमाणाच्चप्रचयादपिजायते॥ अनित्येद्व्यणुकादौतुसंख्याजन्यमुदाहृतम्॥११२॥ परिमाणंघटादौतुपरिमाणजमुच्यते॥

माणम्। नित्यमित्यत्रपरिमाणमित्यनुषज्ज्यते। जायतइत्यत्रापिपरिमाणमित्यनुवर्तते। अनित्यमितिपूर्वेणान्वितम्॥ तथाचानित्यपरिमाणंसंख्याजन्यंपरिमाणजन्यंप्रचयजन्यंचेत्यर्थः। तत्रसंख्याजन्यमुदाहरति। द्व्यणुकादिति। द्व्यणुकस्यत्रसरेणोश्चपरिमाणंप्रतिपरमाणुपरिमाणं द्व्यणुकपरिमाणंत्रानकारणम्॥ परिमाणस्यस्वसजातीयोत्कृष्टपरिमाणजन्यकत्वाद्व्यणुकस्याणुपरिमाणन्तुपरिमाण्वणुत्वापेक्षयानोत्कृष्टम्॥ त्रसरेणुपरिमाणं नसजातीयम्॥ अतःपरमाणोर्हित्वसंख्याद्व्यणुकपरिमाणस्यद्व्यणुकेत्रित्वसंख्याचत्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः॥ परिमाणजन्येपरिमाणमुदाहरति॥ ॥घटादाविति॥ घटादिपरिमाणंकपालादिपरिमाणजन्यम्॥

प्रचयजन्यमुदाहर्तुंप्रचयेति वक्ति॥ प्रचयइति॥ परिमाणञ्चाश्रयनाशादेवनश्यतीत्याह ॥ नाशइति। अर्थात्परिमाणस्यैवनचावयविनाशः। कथंपरिमाणनाशकः॥ सत्यप्यवयविनिश्चितुरादिपरिमाणविश्लेषेतदुपचयेवावयविनःप्रत्यभिज्ञानेपिपरिमाणान्तरस्यप्रत्यक्षसिद्धत्वादिवाच्यम्॥ परमाणुविश्लेषेहिद्व्यणुकस्यनाशोवश्यमभ्युपेयः। तन्नाशेचत्र्यणुकनाशः। एवंक्रमेणमहावयविनोनाशस्यावश्यकत्वात्। सतिचनाशकेनभ्युपगममात्रेणनाशस्यापलपितुमशक्यत्वात्॥ शरीरादावयवोपचयेसमवायिकारणनाशस्यावश्यकत्वादवयविनाशआवश्यकः। नचपटादिनाशेपितन्त्वन्तरसंयोगात्परिमाणाधिक्येन स्यादितिवाच्यम्॥ तत्रापिवेमाद्यभिघातेनासमवायिकारणतन्तुसंयोगनाशात्पटनाशस्यावश्यकत्वात्॥ किञ्चतन्त्वन्तरस्यतत्पटावयवत्वेपूर्वन्तत्पटएवनस्यात्। तन्त्वन्तररूपका

प्रचयःशिथिलावयवसंयोगस्तेनजन्यते॥११३॥परिमाणंतूलकादेर्नाशस्त्वाश्रयनाशतः॥संख्यावत्तुपृथक्त्वंस्यात्पृथक्त्वप्रत्ययकारणं

रणाभावात्। तन्त्वन्तरस्यावयवत्वाभावेचननेनपरिमाणाधिक्यंसंयुक्तद्रव्यान्तरवत्। तस्मान्नतन्त्वन्तरसंयोगेसतिपूर्वंपटनाशस्ततःपटान्तरोत्पत्तिरित्यवश्यंस्वीकार्यम्। अवयविनः प्रत्यभिज्ञानन्तुसाजात्येनादीपकलिकादिवत्॥ नचपूर्वंतन्तवएवतन्त्वन्तरसहकारात्पूर्वंपटेसत्येवपटान्तरमारभन्तामितिवाच्यम्। मूर्तयोः समानदेशतावि रोधात्॥ नत्रपटद्व्यासम्भवात्। एकदानानाद्रव्यस्यतत्रोपलम्भस्यबाधितत्वाच्च। तस्मात्पूर्वस्यद्रव्यस्यप्रतिबन्धकस्यविनाशोद्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वम्। पृथक्त्वेनि रूपयति॥ संख्यावदिति॥ पृथक्त्वप्रत्ययासाधारणंकारणंपृथक्त्वम्। तन्नित्यतादिकंसंख्यावत्। यथाहिनित्येष्वेकत्वेनि त्यमनित्येष्वनित्यम्। अनित्यमेकत्वन्तुआश्रयद्वितीयक्षणेनश्यत्युत्पद्यते। आश्रयनाशान्नश्यति। तथैकपृथक्त्वमपि। द्वित्वादिवच्चद्विपृथक्त्वादिकमपीत्यर्थः॥ ॥ ॥

नन्वयमस्मात्पृथगित्यादावन्योन्याभावोभासतेतत्कथंपृथक्त्वंगुणान्तरंस्वीक्रियते।नचास्पृथक्त्वेन त्वन्योन्याभावइतिवाच्यम्। रूपं नघटइतिप्रतीत्यनापत्तेः।नहिरूपेघटादधिकंपृथक्त्वंगुणान्तरमस्ति।नवाघटेघटादधिकम्पृथक्त्वमस्ति। येनपरम्परासम्बन्धः कल्प्यतइत्यतआह। अन्योन्याभावतइति॥विलक्षणइति॥ननुशब्दवैलक्षण्यमेवनत्वर्थवैलक्षण्यमितिचेन्न। विनार्थभेदंघटात्पृथगितिवद्घटेनपटइत्यत्रापिपञ्चमीप्रसंगात्। तस्माद्यदर्थकयोगेपञ्चमीसोर्थोनजथोन्योन्याभावतोभिन्नोगुणान्तरंकल्प्यतइति।संयोगं निरूपय

॥अन्योन्याभावतोनास्यचरितार्थत्वमिष्यते॥अस्मात्पृथगिदंनेतिप्रतीतिर्हिविलक्षणा॥११५॥अप्राप्तयोरूपयाप्राप्तिःसैवसंयोगईरितः॥कीर्तितस्त्रिविधस्तत्रआद्योन्यतरकर्मजः॥११६॥तथोभयस्पन्दजन्योभवेत्संयोगजोपरः॥आद्यस्तूपेनशैलादिसंयोगःपरिकीर्तितः॥११७॥मेषयोःसन्निपातोयःसद्वितीयउदाहृतः॥कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः॥११८॥तृतीयःस्यात्कर्मजोपिद्विधैवपरिकीर्तितः॥अभिघातोनोदनंचशब्दहेतुरिहादिमः॥११९॥शब्दाहेतुर्द्वितीयःस्याद्विभागोपित्रिधाभवेत्॥एककर्मोद्भवस्त्वाद्योद्वयकर्मोद्भवोपरः॥१२०॥विभागजस्तृतीयःस्यात्तृतीयोपिद्विधाभवेत्॥हेतुमात्रविभागोत्योहेत्व

ति।अप्राप्तेति।तंविभजते।कीर्तितइति।एषःसंयोगः सन्निपातः संयोगः।द्वितीयःउभयकर्मजः।तृतीयइति।संयोगजसंयोगइत्यर्थः।तृतीयःस्यादिति।पूर्ववत्रान्वितआदिमः अभिघातः।द्वितीयो नोदनाख्यः संयोगइति।विभक्तप्रत्ययासाधारणंकारणं।विभागंनिरूपयतिविभागइति। एककर्मकेति। तदुदाहरणंतुश्येनशैलविभागादिकंपूर्ववद्बोध्यम्। तृतीयोपि विभागजःकारणमात्रविभागजन्यःकारणाकारणविभागजन्यश्चेति द्विधाआद्यस्तावत्। यत्रैककपालैककर्मततः कपालद्वयविभागः ततोघटारम्भकसंयोगनाशस्ततोघटनाशः तत

स्तेनैवकपालविभागेनस्वकर्मणः कपालस्याकाशविभागोजन्यते। ततआकाशसंयोगनाशः। ततउत्तरदेशसंयोगः। ततःकर्मनाशइति॥
नचतेनकर्मणैवकथंदेशान्तरविभागोनजन्यतइतिवाच्यम्॥ एकस्यकर्मणआरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसं-
योगप्रतिद्वन्द्विविभागजनकत्वस्यचविरोधात्॥ अन्यथाविकसत्कमलकुड्मलभङ्गप्रसङ्गात्॥ तस्माद्यदीदमनारम्भकसंयोगप्रतिद्वन्द्वि
भागंजनयेत्॥ तदारम्भकसंयोगप्रतिद्वन्द्विविभागंनजनयेत्। नचकारणविभागेनैवद्रव्यनाशात्पूर्वंकुतोदेशान्तरविभागोनजन्यतइति
वाच्यम्। आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोवयवस्यसतिद्रव्येदेशान्तरविभागासम्भवात्। द्वितीयस्तावत्। यत्रहस्तक्रिययाहस्तत
रुविभागस्ततः शरीरेपिविभक्तप्रत्ययोभवति। तत्रशरीरतरुविभागेहस्तक्रियानकारणंव्यधिकरणत्वात्। शरीरेतुक्रियानास्त्येव। अव

परत्वञ्चापरत्वञ्चद्विविधंपरिकीर्तितं॥ दैशिकंकालिकंचापिमूर्त्तएवतुदैशिकं॥१२२॥ परत्वंदेशसंयोगभूयस्त्वज्ञानतो
भवेत्॥ अपरत्वंतदल्पत्वबुद्धितःस्यादितीरितम्॥१२३॥ तयोरसमवायीतुदिक्संयोगस्तदाश्रये॥ दिवाकरपरिस्पन्द
भूयस्त्वज्ञानतोभवेत्॥१२४॥ }} यविकर्मणोयावद्द्रव्यवकर्मनियतत्वात्। अतस्तत्रकारणाकारणविभागेनकार्याकार्यविभागो

जन्यतइति। अतएवविभागोगुणान्तरम्। अन्यथाशरीरेविभक्तप्रत्ययोनस्यात्॥ अतःसंयोगनाशेनविभागोनान्यथासिद्धोभवति। परापर
व्यव्यवहारनिमित्तेपरत्वापरत्वेनिरूपयति॥ परत्वंचेति॥ दैशिकमिति॥ दैशिकपरत्वम्बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते। एवंतदल्पा
यस्त्वज्ञानादपरत्वमुत्पद्यते। अत्रावधित्वार्थंपञ्चम्युपेक्षायथापाटलिपुत्रात्काशीमपेक्ष्यप्रयागः परः पाटलिपुत्रात्कुरुक्षेत्रमपेक्ष्य
प्रयागोःपरइति। तयोर्दैशिकपरत्वापरत्वयोरसमवायी असमवायिकारणम्। तदाश्रये। दैशिकपरत्वापरत्वाश्रये॥ दिवाकरेति॥ ॥

अत्रपरत्वापरत्वंकालिकंग्राह्यं।यस्यसूर्यस्यंदापेक्षयायस्यसूर्यपरिस्पन्दोऽधिकःसज्येष्ठः।यस्यन्यूनःसकनिष्ठः।कालिकपरत्वापरत्वेजन्य
द्रव्येएव अत्रकालिकपरत्वापरत्वयोःतेषाम्। कालिकदैशिकपरत्वापरत्वानाम्। क्रमप्राप्तांबुद्धिंनिरूपयति॥बुद्धेरिति॥ तत्रअप्रमानि
रूपयति।तच्छून्येति। तद्भाववतितत्प्रकारकंज्ञानंभ्रमइत्यर्थः। तत्प्रपञ्चःअप्रमाप्रपञ्चःआद्यइति विपर्यासइत्यर्थः।शरीरादौनि-
श्चयरूपंयदात्मत्वप्रकारकंज्ञानंगौरोहमित्याकारकम्। एवंशरवादौपीतःशरवइत्याकारकंयज्ज्ञाननिश्चयरूपंतद्भ्रमइति॥किंस्विद्

परत्वमपरत्वन्तुतदीयाल्पत्वबुद्धितः॥अत्रत्वमसमवायीस्यात्संयोगःकालपिण्डयोः॥१२५॥अपेक्षाबुद्धिनाशेननाश
स्तेषांनिरूपितः॥बुद्धेःप्रपञ्चःआगेवप्रायशोविनिरूपितः॥१२६॥अथावशिष्टोप्यपरःप्रकारःप्रदर्श्यते॥अप्रमाचाप्रमा
चेतिद्विविधंज्ञानमिष्यते॥१२७॥तच्छून्येतन्नतियोस्यादप्रमासानिरूपिता॥तत्प्रपंचोविपर्यासःसंशयोपिप्रकीर्तितः॥
॥१२८॥आद्योदेहेष्वात्मबुद्धिःशरवादौपीततामतिः॥भवेन्निश्चयरूपापासंशयोऽथप्रदर्श्यते॥१२९॥किंस्विन्नरोवास्था
णुर्वेत्यादिबुद्धिस्तुसंशयः॥तदभावप्रकाराधीस्तत्प्रकारातुनिश्चयः॥१३०॥समंशयोमतियोस्यादेकत्राभावभावयोः॥
साधारणादिधर्मस्यज्ञानंसंशयकारणम्॥१३१॥ }} दितिवितर्केनिश्चयलक्षणमाह॥ तदभावेति॥तदभावप्रकारकंतत्प्रकारकं-
ज्ञानंनिश्चयः।संशयंलक्षयति॥संशयेति॥एकधर्मिकविरुद्धभावाभावप्रकारकंज्ञानंसंशयइत्यर्थः।साधारणेति।उभयसाधारणोयोधर्मं
स्तज्ज्ञानंसंशयकारणम्॥यथाऽच्चैस्तरत्वंस्थाणुपुरुषसाधारणंज्ञात्वास्थाणुर्नवाइतिसंदिग्धएवमसाधारणधर्मज्ञानंसंशयकारणम्।
यथाशब्दत्वंनित्यानित्यव्यावृत्तंशब्देगृहीत्वाशब्दोनित्योनवेतिसन्दिग्धे।विप्रतिपत्तिस्तुशब्देनित्योनवेत्यादिशब्दात्मिकानसंशयकारणं।

शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात्। किन्तु तत्रशब्देनकोटिद्वयज्ञानंजन्यते॥संशयकृन्मानसएवेति। एवंज्ञानेमामा
ण्यसंशयादिषयसंशयइति। एवंव्याप्यसंशयादपिव्यापकसंशयइत्यादिकंबोध्यम्॥ किन्तुसंशयेधर्मिज्ञानंधर्मीन्द्रियसन्निकर्षोवाका
रणमिति। अप्रमांप्रतिदोषःकारणम्। प्रमांप्रतिगुणःकारणम्। तत्रापिपित्तादिरूपादोषाअननुगताः। तेषांकारणत्वमन्वयव्यतिरेका५
भ्यांसिद्धम्। गुणस्यप्रमाजनकत्वंत्वनुमानात्सिद्धम्। यथाप्रमाज्ञानसामान्यकारणभिन्नकारणजन्याजन्यज्ञानत्वाद्भ्रमावत्। नच
दोषाभावएवकारणमस्तितिवाच्यम्। पीतःशंखइति ज्ञानस्थलेपिपित्तरूपदोषसत्वाच्छंखभ्रमानुत्पत्तिप्रसङ्गात्। विनिगमनाविरह
दनन्तदोषाभावस्यकारणत्वमपेक्ष्यगुणस्यकारणतायान्याय्यत्वात्। नचगुणसत्वेपिपित्तेन प्रतिबन्ध्याच्छंखेनश्वेत्यज्ञानम्। अतःपित्ता

दोषोऽप्रमायाजनकःप्रमायास्तुगुणोभवेत्॥पित्तदूरत्वादिरूपोदोषोनानाविधोमतः॥१३२॥प्रत्यक्षेतुविशेष्येणविशेषणवतासमं॥
सन्निकर्षोगुणस्तुस्याद्यत्त्वनुमितौपुनः॥१३३॥पक्षेसाध्यविशिष्टेतुपरामर्शोगुणोभवेत्॥शक्येसादृश्यबुद्धिस्तुभवेदुपमितौगुणः

दिदोषाभावानांकारणत्वमवश्यंवाच्यम्। तथाचकिंगुणस्यहेतुत्वकल्पनेनेतिवाच्यम्। तथाप्यन्वयव्यतिरेकाभ्यांगुणस्यापिहेतुत्वसिद्धे
।एवंभ्रमंप्रतिगुणाभावःकारणमित्यस्यापिसुवचत्वात्। तत्रदोषाः केदृत्याकाङ्क्षायामाह। पित्तेति। क्वचित्पित्तादिभ्रमेपित्तंदोषःक्वचि
च्चक्षुरादेः स्वल्पपरिमाणभ्रमेदूरत्वं दोषः। क्वचिच्चवंशोरगभ्रमेमंडूकवसा ञ्जनभ्रमेत्येवंरूपादोषाअननुगताएवभ्रान्तिजनकाइत्य
र्थः। अथकेगुणादृत्याकाङ्क्षायांप्रत्यक्षादौक्रमेणगुणान्दर्शयति। प्रत्यक्षेत्विति। प्रत्यक्षेविशेषणवद्विशेष्यसन्निकर्षोगुणः। अनुमितौ
साध्यवतिसाध्यव्याप्यवैशिष्ट्यज्ञानंगुणः। एवमग्रेपित्तेपम्। प्रमांनिरूपयति। भ्रममिति। ननुयत्रशुक्तिरजतयोरिमेरजतेइति-

ज्ञानेजातंतत्रारजतांशेपिप्रमानस्यात्।तज्ज्ञानस्यभ्रममिन्नत्वाभावादतआह। अथवेति। तद्हिशेष्यकत्वेसतितत्प्रकारकंज्ञानंभ्रमे
त्यर्थः। अथैवंस्मृतेरपिप्रमात्वंस्यात्ततः। किमितिचेत्तथासतितत्कारणस्यापिप्रमाणान्तरत्वंस्यादितिचेन्नायथार्थानुभवकरणस्येवम
माणत्वेनविवक्षितत्वात्। इदन्तुबोध्यम्।येनसम्बन्धेनयद्वत्तातेनसम्बन्धेनतत्प्रकारकत्वंवाच्यम्।तेनकपालादौसंयोगादिनाघटादि
ज्ञानेनातिव्याप्तिः॥एवंसतिनिर्विकल्पकंप्रमानस्यात्। तस्यसप्रकारकत्वाभावादतआह। तत्रेति। ननुरङ्गेकपिसंयोगज्ञानंभ्रमः प्रा
माचस्यादितिचेन्न।प्रतियोगिव्यधिकरणसंयोगा भाववतिसंयोगज्ञानस्यभ्रमत्वात्। नचरङ्गेकपिसंयोगाभावावच्छेदेनसंयोगज्ञा
नंभ्रमोनस्यात्।तत्रसंयोगाभावस्यप्रतियोगिसमानाधिकरणत्वादितिवाच्यम्॥ तत्रसंयोगाभावावच्छेदेनसंयोगज्ञानस्यभ्रमत्वान्

शाब्दबोधेयोग्यतापास्तात्पर्यस्याथवाप्रमा॥ गुणःस्यात्भ्रमभिन्नेज्ञानमत्राच्यतेप्रमा॥१३५॥ अथवातत्प्रकारंयज्ज्ञानंतद्हि
शेष्यकं॥तत्प्रमानप्रमानापिभ्रमःस्यान्निर्विकल्पकं॥१३६॥प्रकारतादिशून्यंहिसंबन्धानवगाहितत्। प्रामाण्यनस्वतोग्राह्यंसंशयानु
पपत्तितः३७

।लक्ष्यस्यानुगमाल्लक्षणानुगमेपिनक्षतिः। प्रामाण्यमिति। मीमांसकाहि प्रमात्वंस्वतोग्राह्यमितिवदन्ति। तत्रगुरूणां
मतेज्ञानस्यस्वप्रकाशत्वात्तज्ज्ञानप्रामाण्यन्तेनैवगृह्यतइति। भट्टानांमतेज्ञानमतीन्द्रियं ज्ञानजन्यज्ञातताप्रत्यक्षा॥ तयाचज्ञान
मनुमीयते मुरारिमिश्राणांमतेऽनुव्यवसायेनज्ञानंगृह्यते। सर्वेषामपिमतेतत्तज्ज्ञानविषयकज्ञानेनतज्ज्ञानप्रामाण्यंगृह्यते॥ विष
यनिरूप्यंहिज्ञानमतोज्ञानवित्तिवेद्योविषयः।तन्मतेदूषयति।नस्वतोग्राह्यमिति। संशयेति। यदिज्ञानस्यप्रामाण्यंस्वतोग्राह्यंस्यात्त
ज्ज्ञानाभ्यासदशापन्नज्ञानेप्रामाण्यसंशयोनस्यात्। तत्रहि यदिज्ञानं ज्ञातंतदात्वन्मते प्रामाण्यं ज्ञातमेवेतिकथंसंशयः। यदितुज्ञानन

ज्ञानेतरधर्मिज्ञानाभावात्कथंसंशयस्तस्माज्ज्ञानेप्रामाण्यमनुमेयम्॥तथाहि। इदंज्ञानंप्रमा सम्वादिप्रवृत्तिजनकत्वात्। यन्नैवंतन्नैवं। यथा प्र
मा। इदंपृथिवीत्वप्रकारकंज्ञानंप्रमागन्धवतिपृथिवीत्वप्रकारकज्ञानत्वात्। एवमिदंजलत्वप्रकारकंज्ञानंप्रमा। सेहवतिजलत्वप्रकारक
ज्ञानत्वात्॥नचहेतुर्ज्ञानेकथंजातमितिवाच्यम्। पृथिवीत्वप्रकारकत्वस्यस्वतोग्राह्यत्वात्॥तत्रगन्धयुहेणगन्धवद्विशेष्यकत्वस्यापिग्रहः
त्वात्। तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं नगृह्यतेसंशयानुरोधात्। ननुसर्वेषांज्ञानानांयथार्थ[illegible]लक्षणेतद्विशेष्यकत्वं विशे
षणंव्यर्थम्। नचरङ्गेरजतार्थिनः प्रवृत्तिर्भ्रमजन्यान स्यात्तवमतेभ्रमस्याभावादितिवाच्यम्॥ तत्रहिदोषाधीनस्मृतिरोवर्त्तिनिस्वतन्त्रोप
स्थितरजतभेदाग्रहस्यहेतुत्वात्॥सत्यरजतस्थलेतुविशिष्टज्ञानस्यसत्वान्नदेवकारणम्। अस्तुवातत्रापिरजतभेदाग्रहएवकारणमिति
॥नचान्यथाख्यातिःसम्भवतिरजतेप्रत्यक्षकारणस्यरजतसन्निकर्षस्याभावात्॥रङ्गेरजतबुद्धेरनुपपत्तेरितिचेन्नासत्यरजतस्थलेप्रवृत्तिरिति
विशिष्टज्ञानस्यहेतुतापाः कृप्तत्वात्। अन्यत्रापितत्कल्पनात्। नचसम्वादिप्रवृत्तौतत्कारणंविसम्वादिप्रवृत्तौचभेदाग्र[illegible]कारणमितिवाच्य
म्॥ लाघवेनप्रवृत्तिमात्रेतस्यहेतुत्वकल्पनात्॥ इत्यञ्चरङ्गेरजतत्वविशिष्टबुद्ध्यनुरोधेनज्ञानलक्षणप्रत्यासत्तिकल्पनेपिनातिः
फलमुखगौरवस्यादोषात्॥किञ्चयत्रारङ्गेरजतयोरिमेरजतेरङ्गेवेतिज्ञानंज्ञातंतत्रनकारणबाधोपि। अपिचयत्रारंगरजतयोरिमेरजतर
ङ्गेदृतिज्ञानंतत्रोभयत्रयुगपत्प्रवृत्तिनिवृत्तीस्याताम्। रङ्गेरङ्गभेदाग्रहेरजतेरजतभेदाग्रहेचान्यथाख्यातिभयात्। त्वन्मतेदोषादेवरङ्गेरजत
भेदाग्रहस्यरजतेरङ्गभेदाग्रहस्यचसत्वात्। किञ्चानुमितिप्रतिभेदाग्रहस्यहेतुत्वेजलह्रदेवन्हिव्याप्यधूमवद्रङ्गेदाग्रहादनुमितिर्निराबा
धा। यदिचविशिष्टज्ञानकारणंनदोषोगौलकेवह्निव्याप्यधूमज्ञानमनुमित्यनुरोधादापतितंसेयमुभयतः पाशारज्जुः। इत्यञ्चान्यथाख्या
तौप्रत्यक्षमेवप्रमाणम्। रङ्गेरजततयावेदिषमित्यनुभवादितिसंक्षेपः। पूर्वव्याख्यातमुक्तानुवादेनोपसंहरन्नुत्तरग्रन्थंसूचयति

॥व्यभिचारेति॥व्यभिचाराग्रहःसहचारग्रहश्चव्याप्तिग्रहेकारणम्॥ व्यभिचारग्रहस्यव्याप्तिग्रहेप्रतिबंधकत्वात्तदभावःकारणम्॥एवम
न्वयव्यतिरेकाभ्यांसहचारग्रहस्यापिहेतुता॥भूयोदर्शनंतुनकारणम्। व्यभिचारास्कूर्तौसकृद्दर्शनेपिक्वचिद्व्याप्तिग्रहात्।क्वचिद्व्यभि
चारशंकाविधूननद्वाराभूयोदर्शनमुपयुज्यते। यत्रतुभूयोदर्शनादपिशंकानापैतितत्रविपक्षबाधकतर्कोपेक्षितः॥ तथाहि वन्हिविर
हिण्यपिधूमःस्यादितियद्याशंकाभवति तदासावन्हिधूमयोः कार्यकारणभावस्यप्रतिसन्धानान्निवर्तते।यद्ययंवन्हिमान्नस्यात्तदा
धूमवान्नस्यात्कारणंविनाकार्यानुपपत्तेः। यदिचक्वचित्कारणंविनाकार्यं भविष्यतितदाऽहेतुकएवभविष्यतीतितत्राप्याशंकाभवेत्॥
तदासाव्याघातादपसारणीया॥यदिहिकारणंविनाकार्यंस्यात्तदाधूमार्थिवन्हेस्तृप्यर्थंभोजनस्यनियमतउपादानंतवैवनस्यादिति। य

व्यभिचारस्याग्रहोयसहचारग्रहस्तथा॥हेतुर्व्याप्तिग्रहेतर्कःक्वचिच्छंकानिवर्तकः॥३८॥साध्यस्यव्यापकोयस्तद्धेतो
रव्यापकस्तथा॥सउपाधिर्भवेत्तस्यनिरूपणायंप्रदर्श्यते॥३९॥ ॥ त्रस्तएवशंकानाव तरति तत्रनतर्कोपेक्षाणीतिदिदृक्षुः तर्कः

क्वचिच्छंकानिवर्तकइति। इदानींपरकीयव्याप्तिग्रहप्रतिबन्धार्थमुपाधिंनिरूपयितुमाह॥साध्येति। साध्यत्वाभिमतव्यापकत्वंसतिसा
धनत्वाभिमताव्यापकत्वमुपाधिरित्यर्थः।ननुसश्यामोमित्रातनूत्वादित्यत्रशाकपाकजन्यत्वंनोपाधिःस्यात्तस्यसाध्यव्यापकत्वाभावा
च्छ्यामत्वस्यघटादावपिसत्त्वात्॥एवंवायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्वंनोपाधिःस्यात्।प्रत्यक्षत्वस्यात्मादिष्वसत्वा
त्।तत्रचरूपाभावात्।एवंध्वंसोविनाशीजन्यत्वादित्यत्रभावत्वंनोपाधिःस्याद्विनाशित्वस्यप्रागभावेसत्त्वात्।तत्रभावत्वाभावादितिचे
न्न।यद्भावच्छिन्नसाध्यव्यापकत्वंतद्भावच्छिन्नसाधनाव्यापकत्वमित्यर्थेनातिप्रसंगात्॥ मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकं-

शाकपाकजत्वंतदवच्छिन्नसाधनाव्यापकंच॥एवंपक्षधर्मवद्द्रव्यत्वावच्छिन्नपक्षसत्त्वस्यव्यापकमुद्भूतरूपवत्वम्।एवंबहिर्द्रव्यत्वा
वच्छिन्नसाधनस्याव्यापकत्वं। एवंध्वंसोविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्नसाध्यव्याकत्वभावत्वौ। सद्धेतावेतादृशोधर्मोनास्ति
यदवच्छिन्नसाध्यस्यव्यापकं तदवच्छिन्नस्यसाधनस्यचाव्यापकं किंचित्स्यात्॥व्यभिचारिणितूपाध्यधिकरणंयत्साध्याधिकरणं
यच्चोपाधिशून्यसाध्यव्यभिचाराधिकरणं तदन्यत्वावच्छिन्नस्यसाध्यस्यव्यापकत्वसाधनस्यवाव्यापकत्वमुपाधेरंततःसम्भवतीति॥
अतएवलक्ष्यमप्युपाधिस्वरूपमेतदनुसारेणदर्शयति॥सर्वइति॥स्वञ्चसाध्यंचस्वसाध्येतयोर्व्यभिचारितत्यर्थः।उपाधेर्दूषकता वी
जमाह। व्यभिचारस्येति।उपाधिव्यभिचारेणहेतौसाध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः। तथाहियत्रशुद्धसाध्यव्यापकउपाधि

सर्वेसाध्यसमानाधिकरणाःसदुपाधयः॥हेतोरेकाश्रयेयेषांस्वसाध्यव्यभिचारिता॥४०॥व्यभिचारस्यानुमानमुपाधेस्तु
प्रयोजनं॥शब्दोपमानयोर्नैवपृथक्प्रामाण्यमिष्यते॥४१॥}}स्तत्रशुद्धेनैवोपाधिव्यभिचारेणसाध्यव्यभिचारानुमानम्।यथावह्न
वान्द्रव्यत्वेरित्यादौवन्हिधूमव्यभिचारीतद्व्यापकोद्रव्यनसंयोगव्यभिचारित्वादिति। व्यापकव्यभिचारिणोव्याप्यव्यभिचारावश्यकत्वात्॥
यत्रतुकिंचिद्धर्मावच्छिन्नसाध्यस्यव्यापकउपाधिस्तत्रतद्धर्मवतिउपाधिव्यभिचारेणसाध्यव्यभिचारानुमानम्।यथासश्यामोमित्रा ते
न यत्वादित्यादौ मित्रातनयत्वंश्यामत्वव्यभिचारिमित्रातनयेशकपाकजत्वव्यभिचारित्वादिति बाधानुन्नीतपक्षेतरस्तुसाध्य
व्यापकताग्राहकप्रमाणाभावात्॥स्वव्याघातकत्वाच्चनोपाधिः॥ बाधोन्नीतस्तुपक्षेतरउपाधिर्भवत्येव। यथावह्निरनुष्णः कृतकत्वादि
त्यादौप्रत्यक्षेणवन्हावुष्णत्वग्रहेवह्नीतरत्वमुपाधिः।यत्रतूपाधेः साध्यव्यापकतासंदिग्धतेससंदिग्धोपाधिःपक्षेतरस्तुसन्दिग्धोपाधि

रूपिनोद्भावनीयः। कथकसंप्रदायानुरोधात्॥ केचित्तुसत्प्रतिपक्षोत्थापनमुपाधेःफलं तथाहि। अयोगोलकंधूमवद्वह्नेरित्यत्रो अयो
गोलकंधूमाभाववत् आर्द्रेन्धनाभावाद्वितिसत्प्रतिपक्षसम्भवात्। इत्यव्यभिचारसाधनव्यापकोपिक्वचिदुपाधिः। यथाकरकादिमत्वेकवि
नसंयोगवत्वादित्यादौ अनुष्णाशीतस्पर्शवत्वम्। नचात्रस्वरूपसदुपाधिरवदूषणमितिवाच्यम्। सर्वत्रोपाधेर्दूषणांतरसाकांक्षत्वात्। अ
त्रचसाध्यव्यापकःपक्षावृत्तिरूपाधिरितिवदंति। शब्दोपमानयोरिति। वैशेषिकाणामतेप्रत्यक्षमनुमानंचप्रमाणम्॥ शब्दोपमानयो
स्तु अनुमानविधयैवप्रामाण्यम्॥ तथाहि दण्डेनगामानयेत्यादिलौकिकपदानिवैदिकपदानिवा तात्पर्यविषयस्यान्वितपदार्थसंसर्ग
प्रमापूर्वकाणिआकांक्षादिमत्पदकदंबकत्वात्॥ घटमानयेतिपदकदम्बकवत्पदाद्येतेपदार्थामिथः संसर्गवंतः योग्यतादिमत्प
अनुमानगतार्थत्वादितिवैशेषिकंमतं॥ तन्नसम्यग्व्याप्तिबोधंशब्दादिबोधतः॥१४२॥त्रैविध्यमनुमानस्यकेवलान्व
यिभेदतः॥ द्वैविध्यंतुभवेद्व्याप्तेरन्वयव्यतिरेकतः॥१४३॥ ॥ तोपस्थापितत्वान्नादृशपदार्थवदृष्टांतेपिदृष्टान्तान्तरेणसाध्यसिद्धिरि

ति। एवं गवयव्यक्तिप्रत्यक्षानन्तरंगवयपदंगवयत्वप्रवृत्तिनिमित्तकम्। असतिवृत्यन्तरेवृद्धै स्तत्रप्रयुज्यमानत्वात्। अस्तिवृत्य
न्तरंवृद्धैर्यत्रयत्रप्रयुज्यतेतत्रतत्रतत्प्रवृत्तिनिमित्तकंयथागोपदंगोत्वप्रवृत्तिनिमित्तकम्॥ यद्वा गवयपदंसप्रवृत्तिनिमित्तकंसाधुप
दत्वादित्यनुमानेनपक्षधर्मतावलाद्गवयत्वप्रवृत्तिनिमित्तकत्वंसिध्यति॥ तन्मतंदूषयति। तन्नसम्यगिति। व्याप्तिज्ञानंविनाशब्दा
दितोबोधस्यानुभवसिद्धत्वात्॥ नहिसर्वत्रशब्दश्रवणानन्तरंव्याप्तिज्ञानेप्रमाणमस्तीति॥ किंचसर्वत्रशब्दस्थलेयदिव्याप्तिज्ञानंक
ल्प्यते। नह्यसर्वत्रानुमितिस्थलेपदज्ञानकल्पयित्वाशाब्दबोधएवकिन्नस्वीक्रियतामितिध्येयम्॥ द्वैविध्यमिति। ॥ ॥

अनुमानंहित्रिविधंकेवलान्वयिकेवलव्यतिरेकि अन्वयव्यतिरेकिभेदात्। तत्रासद्विपक्षःकेवलान्वयि॥ यथाघटोऽभिधेयःप्रमेयत्वादि
त्यादौतत्रहिसर्वस्यैवाभिधेयत्वादिपक्षासत्वम्॥ असत्सपक्षःकेवलव्यतिरेकी॥यथापृथिवीइतरेभ्योभिद्यतेगन्धवत्वादित्यादौ तत्रहि
जलादित्रयादशभेदस्यपूर्वमनिश्चिततयानिश्चितसाध्यवतः सपक्षस्याभावात्।सत्सपक्षविपक्षोऽन्वयव्यतिरेकीयथावह्निमान्धूमा
दित्यादौतत्रसपक्षस्यमहानसादेर्विपक्षस्यजलह्रदादेश्चसत्वादिति। तत्रहिव्यतिरेकिणिव्यतिरेकव्याप्तिज्ञानंकारणंतदर्थंव्यतिरेक
व्याप्तिंनिर्वक्ति॥साध्याभावेति॥ साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। अत्रेदंबोध्यम्। यत्संबंधेनयद्यत्र प्रति
येनसंबन्धेनयेनरूपेणव्यापकतागृह्यते।तत्संबंधावच्छिन्नप्रतियोगिताकतद्भावावच्छिन्नाभावज्ञानात्॥ तत्संबंधावच्छिन्नप्रति

अन्वयव्याप्तिरुक्तैवव्यतिरेकिण्यथोच्यते॥साध्याभावव्यापकत्वंहेत्वभावस्ययद्भवेत्॥१४४॥

योगिताकतद्भावावच्छिन्नाभावस्यसिद्धिरिति। इत्यन्वयत्रविशेषणतासम्बन्धेनेतरत्वव्यापकत्वङ्कृत्वात्यन्ताभावेगृह्यते। तत्रगन्धाभा
वाभावेनेतरत्वात्यन्ताभावःसिद्ध्यति।यत्रतुतादात्म्यसम्बन्धेनेतरव्यापकत्वंगन्धाभावस्यगृह्यते। तत्रतादात्म्यसम्बन्धेनेतरस्याभावः
सिद्ध्यति। सएवान्योन्याभावः।एवंयत्रसंयोगसम्बन्धेनधूमंप्रतिसंयोगसम्बन्धेनवह्न्यादिव्यापकतागृह्यते॥ तत्रसंयोगसम्बन्धावच्छि
न्नप्रतियोगिताकवह्न्यभावेनजलह्रदेसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्ध्यति।अत्रचव्यतिरेकव्याप्तिग्रहेव्यतिरेक
सहचारज्ञानंकारणम्॥ केचित्तुव्यतिरेकसहचारेणान्वयव्याप्तिरेवगृह्यते॥ नतुव्यतिरेकव्याप्तिज्ञानमपिकारणम्॥यत्रव्यतिरेक
सहचाराद्व्याप्तिग्रहस्तत्रव्यतिरेकीत्युच्यते॥साध्यमसिद्धिस्तुघटादावजाता।पश्चात्पृथिवीत्वावच्छेदेनसाध्यतइतिवदन्ति॥ ॥

अर्थापत्तिरिति। अर्थापत्तिः प्रमाणांतरमितिकेचिन्मान्यन्ते। तथाहि। यत्रदेवदत्तस्यशतवर्षजीवित्वं ज्योतिःशास्त्रादवगतंजीविनोगृहासत्वं चप्रत्यक्षादवगतंतत्रशतवर्षजीविनोगृहासत्वंबहिः सत्वेविनाऽनुपपन्नमितिबहिः सत्वंकल्प्यतइति। तदप्यनुमानेनगतार्थत्वान्नेष्यते। तथाहि। यत्रजीवित्वस्यबहिः सत्वगृहसत्वान्यतरव्याप्यत्वंगृहीतंतत्रान्यतरसिद्धौजायमानायांगृहसत्वबाधाद्बहिः सत्वमनुमितौभासते॥ एवंपीनोदेवदत्तोदिवानभुङ्क्तेइत्यादौपीनत्वस्यभोजनव्याप्यत्वावगमाद्भोजनसिद्धेर्दिवाभोजनबाधेरात्रिभोजनंसिध्यतीति। अभावप्रत्यक्षस्यानुभाविकत्वादनुपलंभोपिनप्रमाणान्तरम्। किञ्चानुपलम्भस्यज्ञातस्यहेतुत्वेज्ञानाकरणत्वात् प्रत्यक्षम्। ज्ञातस्यहेतुत्वेतुतत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था॥ एवंचेष्टापिनप्रमाणान्तरंतस्याः संकेतग्राहकशब्दस्मारकत्वेनलिप्यादिसमशीलत्वाच्छाब्द

अर्थापत्तेस्तुनैवेहप्रमाणान्तरतेष्यते॥ व्यतिरेकव्याप्तिबुध्याचरितार्थाहिसायतः॥१४५॥सुखंतुजगतामेककाम्यंधर्मेणजन्यते॥ अधर्मजन्यंदुःखंस्यात्प्रतिकूलंसचेतसां॥१४६॥निर्दुःखत्वेसुखंचेच्छानज्ञानादेवजायते॥ इच्छातुतदुपायेस्यादिष्टोपायत्वधीर्यदि॥ ॥

एवान्तर्भावात्। यत्रचव्याप्त्यादिग्रहस्तत्रानुमितिरेवेति। सुखंनिरूपयति। सुखमिति। काम्यमभिलाषविषयः। धर्मेणेति। धर्मत्वेनसुखत्वेनकार्यकारणभावइत्यर्थः। दुःखंनिरूपयति। अधर्मेतिः। अधर्मत्वेनदुःखत्वेनकार्यकारणभावइत्यर्थः। प्रतिकूलमिति। दुःखत्वज्ञानादेवसर्वेषांस्वाभाविकद्वेषविषयइत्यर्थः। इच्छांनिरूपयति। निर्दुःखत्वइति। इच्छाद्विविधाफलविषयिणीउपायविषयिणीच। फलंतुसुखंदुःखाभावश्च। तत्रफलेच्छांप्रतिफलज्ञानंकारणम्॥ अतएव पुरुषार्थःसम्भवतियज्ज्ञानंसत्स्वरुचितयेष्यते। सपुरुषार्थइतितल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वंफलितोऽर्थः॥ ॥

उपायेच्छांप्रतीष्टसाधनताज्ञानंकारणम्॥ चिकीर्षेति॥ कृतिसाध्यत्वप्रकारिकाकृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा। पाकंकृत्यासाधयामी
तितदनुभवात्॥ चिकीर्षाप्रतिकृतिसाध्यताज्ञानमिष्टसाधनताज्ञानंचकारणम्॥ तद्धेतुरिति॥ अतएववृष्ट्यादौकृतिसाध्यताज्ञानाभा
वान्नचिकीर्षाबलवद्दिष्टेति। बलवद्दिष्टसाधनताज्ञानंतत्रप्रतिबन्धकमतोमधुविषसंपृक्तान्नभोजनेनचिकीर्षा। बलवद्द्वेषः प्रतिबन्धकइ
त्यन्ये। नद्धेतुरिति॥ बलवदनिष्टजनकत्वज्ञानंकारणमित्यर्थः॥ द्वेषंनिरूपयति। द्विष्टेति। दुःखोपायविषयकंद्वेषंप्रतिबलवद्दिष्टसाध
नताज्ञानंकारणमित्यर्थः। बलवद्दिष्टसाधनताज्ञानंप्रतिबन्धकंतेननानन्तरीयकदुःखजनकेपाकादौनद्वेषः। प्रयत्नंनिरूपयति। कृतिरिति

चिकीर्षाकृतिसाध्यत्वप्रकारेच्छानुयाभवेत्॥१४७॥ नद्धेतुःकृतिसाध्येष्टसाधनत्वमतिर्भवेत्॥ बलव द्दिष्टहेतुत्वमतिःस्यात्प्र
त्तिबन्धिका॥१४८॥ तद्धेतुत्वबुद्धेस्तद्धेतुत्वंकस्यचिन्मते॥ द्विष्टसाधनताज्ञानंभवेद्द्वेषस्यकारणम्॥१४९॥ प्रवृत्तिश्चनिवृत्तिश्च
तथाजीवनकारणम्॥ एवंप्रयत्नत्रैविध्यनान्त्रिकैःपरिकीर्तितम्॥१५०॥ चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा॥ ७ ॥

प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदान्त्रिविधःप्रयत्नइत्यर्थः। चिकीर्षेति। मधुविषसंपृक्तान्नभोजनादौबलवदनिष्टानुबन्धित्वेननचिकीर्षाभाव
त्प्रवृत्तिरितिभावः। कृतिसाध्यताज्ञानादिवह्लबलवदनिष्टाननुबन्धित्वज्ञानमपिस्वतन्त्रान्वय व्यतिरेकाभ्यांप्रवृत्तौकारणमित्यपिवदंति
॥कार्यताज्ञानंप्रवर्त्तकमितिगुरवः। तथाहिज्ञानस्यप्रवृत्तौजननीयायांचिकीर्षातिरिक्तनापेक्षितमस्ति। साचकृतिसाध्यताज्ञानसाध्या॥ इ
च्छायाःस्वप्रकारप्रकारकधीस्साध्यत्वनियमात्॥ चिकीर्षाहिकृतिसाध्यत्वप्रकारिकेच्छा।तत्रकृतिसाध्यत्वप्रकारस्तत्प्रकारकंज्ञानंचिकी
र्षाजनकज्ञानजन्योभवेत्। नत्विष्टसाधनताज्ञानंतत्रहेतुःकृत्यसाध्येपिचन्द्रमण्डलानयनादौप्रवृत्त्यापत्तेः। कृत्यसाध्यताज्ञानंप्रतिबन्ध

कृमितिचेन्न॥ तद्भावापेक्षयाकृतिसाध्यत्वज्ञानस्यलघुत्वात्॥ नचहृद्योरेवहेतुत्वंगौरवात्। ननुत्वन्मतेपिमधुविषसंपृक्तान्नभोजनेचैत्यव
न्नेचप्रवृत्त्यापत्तिः कार्यताज्ञानस्यसत्त्वादितिचेन्न। स्वविशेषणवत्ताप्रतिसन्धानज- कार्यताज्ञानस्यप्रवर्त्तकत्वात्॥ काम्येहिफलकर्या
गादौकामनापुंविशेषणंततश्चबलवद्निष्टाननुबन्धिकाम्यसाधनताज्ञानेनकार्यताज्ञानंततश्चप्रवृत्तिः। तृप्तश्चभोजनेनप्रवर्त्तते तदानीं
कामनायाःपुरुषविशेषणत्वाभावात्॥ नित्येचशौचादिकंपुरुषविशेषणंतेनशौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्रप्रवृत्तिः। ननुत
दपेक्षयालाघवेनबलवद्निष्टाननुबन्धीष्टसाधनताविषयककार्यताज्ञानत्वमेवहेतुत्वमस्तु। बलवद्निष्टाननुबन्धित्वंचेष्टोत्पत्तिनान्त
रीयकदुःखाधिकदुःखजनकत्वंबलवद्द्वेषविषयदुःखजनकत्वंवेति चेन्न। दृष्टासाधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्सा
ध्यत्वसाधनत्वयोर्विरोधित्वात्॥ असिद्धेस्त्वहिसाध्यत्वमिदंस्यचसाधनत्वंनत्वेकमेकेनैकदासिद्धमसिद्धेतिज्ञायते। तस्मात्कालभेदादुभय
ज्ञायतइतिमैवम्। लाघवेनबलवद्निष्टाननुबन्धीष्टसाधनत्वेसतिकृतिसाध्यताज्ञानस्यतत्रहेतुत्वात्। नचसाध्यत्वसाधनत्वयोर्विरो
धः। यदाकदाचित्साध्यत्वसाधनत्वयोरविरोधादेकदासाध्यत्वसाधनत्वयोश्चज्ञानात्। नच्यात्कृमभेदंकृतिसाध्यमितिज्ञानंनप्रवर्त्तकम
नागतेतस्यज्ञातुमशक्यत्वात्। किंतुयादृशपुंसःकृतिसाध्यंयदृष्टंतादृशत्वंस्वस्यप्रतिसन्धायतत्रप्रवर्त्ततेतेनोदनकामस्यतत्साधन
ताज्ञानवतस्तदुपकरणवतःपाकःकृतिसाध्यः तादृशश्चाहमिति। प्रतिसन्धायपाके प्रवर्त्तनइत्याहुः। तन्न स्वकल्पितलिप्यादिप्रवृत्तौ
यौवनेकामोड्ढेदादिनासंभोगादौचतद्भावात्। इदंतुबोध्यम्। इदानींतनेष्टसाधनत्वादिज्ञानंप्रवर्तकम्। तेनभावियौवराज्येबालस्यन
प्रवृत्तिः। इदानींकृतिसाध्यत्वाज्ञानात्॥ एवंतृप्तश्चभोजनेनप्रवर्त्ततेइदानीमिष्टसाधनत्वाज्ञानात्प्रवर्त्ततेचरोषदूषितचित्तोविषादिभक्ष
णेइदानींबलवद्निष्टाननुबन्धित्वज्ञानात्। नचास्तिकस्यागम्यागमनशत्रुवधादिप्रवृत्तौकश्चबलवद्निष्टाननुबंधित्वबुद्धिर्नरकसाधन

त्वज्ञानादितिवाच्यम्॥ उत्कटरागादिनानरकसाधनताधीतिरोधानात्। दृष्टयादौतुकृतिसाध्यताज्ञानाभावान्नचिकीर्षाप्रवृत्तीकिंत्विष्टसा
धनताज्ञानादिच्छामात्रम्॥ कृतिस्तुप्रवृत्तिरूपाबोध्या। तेनजीवनयोनियत्नसाध्येप्राणपञ्चकसंचारेनप्रवृत्तिः। इत्थञ्चप्रवर्त्तकत्वानुरोधाद्वि
धेरपीष्टसाधनत्वादिकमर्थः॥ इत्थञ्चविश्वजिताद्ययजेतस्वर्गकामइत्यादौयत्रफलंनश्रूयतेतत्रापिस्वर्गःफलंकल्प्यते। नन्वहरहःसन्ध्यामुपासीतेत्या
द्यविशेषानुत्पत्तेःप्रवृत्तिःकथम्॥ नचार्थवादिकंब्रह्मलोकादिप्रत्यवायाभावोवाफलमितिवाच्यम्। तथासतिकाम्यत्वेनित्यत्वहान्यापत्तेःकामना
भावेचाकरणापत्तेः। इत्थञ्चयत्रफलश्रुतिस्तत्रार्थवादमात्रमितिचेन्न॥ ग्रहणश्राद्धादौनित्यत्वनैमित्तिकत्वयोरिवनित्यत्वकाम्यत्वयोरप्यवि
रोधात्। नचकामनाभावेःकारणापत्तिः॥ त्रिकालस्नानपाठादाविवकामनासङ्कावस्यैवकल्पनात्॥ ननुवेदबोधितकार्यतानुज्ञानात्प्रवृत्तिरितिचे
सम्भवतिस्विष्टसाधनत्वमज्ञायतादृशकार्यतानुज्ञानमहस्तेणापिप्रवृत्तेरसम्भवात्॥ यद्पिपण्डापूर्वफलमितितद्पिनकामनाभावेःकरणता
पत्तेस्तौल्यात्कामनाकल्पनेत्वार्थवादिकंफलमेवरात्रिसत्रन्यायात्कल्प्यताम्॥ अन्यथाप्रवृत्त्यनुपपत्तेः। तेनानुत्पत्तिंप्रत्यवायस्यान्येमन्य
न्ते। एवंसन्ध्यामुपासतेयेतुसततंशंसितव्रताः।विधूतपापास्तेयान्तिब्रह्मलोकमनामयम्। एवंद्यादहरहः श्राद्धंपित्रभ्यःप्रीतिमावहन्
इतिप्रीत्यात्मकमेवफलमस्तु ॥ नचपित्रप्रीतिः कथंफलव्यधिकरणत्वादितिवाच्यम्। गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैवफलजनकत्व
स्यकुत्रचित्कल्पनात्॥ अतएवोक्तंशास्त्रदर्शितंफलमनुष्ठानकर्त्तरीत्युत्सर्गइति। पितृणांमुक्तत्वेतुस्वस्यस्वर्गादिफलंपावत्। नित्यनैमि
त्तिकानुष्ठानस्यसामान्यतः स्वर्गजनकत्वात्पण्डापूर्वार्थंप्रवृत्तिश्चनसम्भवति। नहितत्सुखदुःखाभावबत्स्वतःपुरुषार्थः। नवातत्साधनम्
प्रत्यवायानुत्पत्तौकथंप्रवृत्तिरितिचेत्। इत्थम्। यद्यहि। नित्येकृतेप्रत्यवायाभावस्तिष्ठति। तदभावे तदभावः एवमत्यवायाभावसत्वेदुः
खप्रागभावसत्वंतदभावेतदभावइतियोगक्षेमसाधारणकारणतायादुःखप्रागभावंप्रत्यपिकृतत्वात्। एवमेवप्रायश्चित्तस्यापिदुःख

प्रागभावहेतुत्वमिति। ननुनकलंजभक्षणेदित्यत्रविध्यर्थैकवाक्यतयानञर्थान्वयः। दृष्टसाधनताभावस्यकृतिसाध्यताभावस्यचबोधयितुमशक्यत्वादि
तिचेन्नात्र बाधादिदृष्टसाधनत्वंकृतिसाध्यत्वञ्चनविध्यर्थः। किंतुबलवद्निष्टाननुबन्धित्वमात्रंतद्भावश्चनञाबोध्यते॥ अथवाबलवद्निष्टाननु
बन्धित्वविशिष्टेष्टसाधनत्वेसतिकृतिसाध्यत्वंविध्यर्थः। तद्भावश्चनञाबोध्यमानोविशिष्टाभावोविशेष्यवतिविशेषणाभावेविश्राम्यति।
ननुश्येनेनाभिचरन्यजेतेत्यादौकथं बलवद्निष्टाननुबन्धित्वमर्थः श्येनस्यमरणानुकूलव्यापारस्यहिंसात्वेननरकसाधनत्वात्। नचवै
धत्वान्ननिषेधद्वारेतिवाच्यम्। अभिचारेप्रायश्चित्तोपदेशात्। नचमरणानुकूलव्यापारमात्रंयदिहिंसातदाखड्गप्रहारस्यकूपकर्तुश्चहिंसकत्वा
पत्तिर्गरलसंसर्गान्नभक्षणजन्यमरणेआत्मवधत्वापत्तिश्चेतिवाच्यम्॥ मरणोद्देश्यकत्वस्यापिविशेषणत्वात्। अन्योद्देश्यकसिंहनाराचह
तब्राह्मणस्यतुवाचनिकंप्रायश्चित्तमितिचेन्न। श्येनवारणायादृष्टाद्वारकत्वेनविशेषणात्। अतएवकाशीमरणार्थंकृतशिवपूजादेरपिनहिं
सात्वम्। नचमांसान्मरणजनकस्यैवहिंसात्वंश्येनस्तूनतथाकिंतुतज्जन्यापूर्वमितिवाच्यम्। खड्गघातेनब्राह्मणेव्रणपाकपरम्परया
मृतेहिंसात्वानापत्तेः॥ ॥ ॥ ॥ ॥ केचित्तुश्येनस्यहिंसाफलंनतुमरणंतेनश्येनजन्यखड्गाघातादिरूपाहिंसाभि
चारपदार्थस्तस्यपापजनकत्वम्। अतःश्येनस्यवैधत्वात्पापाजनकत्वेपि। अग्रिमपापप्रतिसंधायसंतोनप्रवर्त्तन्तेइत्याहुः। आचार्यास्तु
आप्ताभिप्रायोविध्यर्थः। पाकंकुर्योदित्यादावाख्यादिरूपेच्छावाचित्ववत्। लिङ्मात्रस्येच्छावाचित्वंलाघवात्। एवंचस्वर्गकामोयजेतेत्या
दौयागःस्वर्गकामकृतिसाध्यतयाआप्तेरिष्टत्वर्थः। ननुश्वाप्तेरिष्टत्वेनेष्टसाधनत्वादिकमनुमायप्रवर्त्तते। कलंजभक्षणेतद्भावान्नप्रवर्त्त
ते यस्तुवेदेपौरुषेय त्वंना श्रुतेतिन्यायेनविधिरेवतावद्भवदभिमतिकुमार्याःपुंयोगेमानम्॥ ननुकर्त्तृस्मरणंबाधकम्। कपिलकणादा
दिभिरद्यपर्यन्तंकर्त्तृस्मरणस्यैवप्रतीयमानत्वात्। अन्यथास्मृतीनामप्यकर्त्तृकत्वापत्तेः। तत्रैवकर्त्तृस्मरणमस्तीतिचेद्वेदेपिछन्दांसिज

ज्ञिरेतस्यादित्यादिकर्त्तृस्मरणमस्त्येव। एवंप्रतिमन्वन्तरंचैषाश्रुतिरन्याविधीयतेइत्यपिद्रष्टव्यम्। स्वयंभूरेषभगवान्वेदोगीतस्त्वयापुरा
॥ शिवादिऋषिपर्यन्ताः स्मर्तारोऽस्यनकारकाइतिवेदस्यस्तुतिमात्रम्। नचपौरुषेयत्वेभ्रमादिसम्भवात् अप्रामाण्यंस्यादितिवाच्यम्
। नित्यसर्वज्ञत्वेननिर्दोषत्वात्। अतएवपुरुषान्तरस्यभ्रमादिसम्भवान्नकपिलादेरपिकर्त्तृत्ववेदस्य। किंचवर्णानामेवानित्यत्वस्यवक्ष्य
माणत्वात्कृतरान्तत्सन्दर्भस्यवेदस्यानित्यत्वमितिसंक्षेपः॥ उपादानस्येति॥ उपादानस्यसमवायिकारणस्याध्यक्षम्प्रत्यक्षं। प्रवृत्तौ
कारणमिति॥ निवृत्तिरिति। द्विष्टसाधनताज्ञानस्यनिवृत्तिप्रतिजनकत्वमन्वयव्यतिरेकाभ्यामवधारितमितिभावः। यत्वइति। जीवनयोनि

उपादानस्यचाध्यक्षंप्रवृत्तौजनकंभवेत्॥ निवृत्तिस्तुभवेद्द्वेषाद्विष्टसाधनताधियः॥१५३॥ यत्तोजीवनयोनिस्तुसर्वदातींद्रि
योभवेत्॥ शरीरप्राणसंचारेकारणंसप्रकीर्तितः॥१५३॥ अतीन्द्रियंगुरुत्वंस्यात्पृथिव्यादित्रयेतुतत्॥ अनित्येनद्यनित्यंस्या
न्नित्येनित्यमुदाहृतम्॥१५४॥ तदेवासमवायिस्यात्पतनारब्धेतुकर्म्मणि॥ सांसिद्धिकंद्रवत्वंस्यान्नैमित्तिकमथापरम्॥
सांसिद्धिकंतुसलिलेद्वितीयंक्षितितेजसोः॥ }} यत्तोयावज्जीवनमनुवर्त्ततेसचातीन्द्रियः॥तत्रप्रमाणमाह॥ शरीरइति॥ प्राणसं
चारोहिप्रयत्नसाध्यः॥ इत्यन्वयप्राणसंचारस्यसर्वस्ययत्नसाध्यत्वानुमानात्। प्रत्यक्षप्रयत्नबाधाच्चानीन्द्रियप्रयत्नसिद्धिः सएवजीव
नयोनिर्यत्नः। गुरुत्वंनिरूपयति। अतीन्द्रियमिति॥ अनित्येति॥ अनित्येद्व्यणुकादौतद्गुरुत्वमनित्यंनित्येपरमाणौनित्यंगुरुत्वमित्य
नुवर्त्तते तद्गुरुत्वमसमवायिअसमवायिकारणम्॥ तदेवेति॥ पतनारब्धइति॥ आद्यपतनेइत्यर्थः। द्रवत्वंनिरूपयति॥ सां
सिद्धिकमिति॥ द्रवत्वंद्विविधंसांसिद्धिकंनैमित्तिकंचेत्यर्थः॥ द्वितीयं नैमित्तिकम्॥

॥परमाणाविति॥जलपरमाणोर्द्रवत्वंनित्यमित्यर्थः॥अन्यत्रपृथिवीपरमाण्वादौजलाद्यणुकादौचद्रवत्वमनित्यंकुत्रचिन्नेजसिकुत्रचित्पृथिव्यांचनैमित्तिकंद्रवत्वंतत्रकोवानैमित्तिकार्थस्तद्दर्शयति॥नैमित्तिकमिति॥वन्हीति।अग्निसंयोगजन्यंनैमित्तिकंद्रवत्वं।तच्चसुवर्णादिरूपेतेजसिघृतजतुप्रभृतिपृथिव्यांचवर्त्ततइत्यर्थः॥द्रवत्वमिति॥हेतुरिति।असमवायिकारणमित्यर्थः।संग्रहेसक्तुकादिसंयोगविशेषेणद्रवत्वंस्नेहसहितमितिबोध्यं।तेनद्रुतस्रुवर्णादीनांनसंग्रहः।स्नेहंनिरूपयति।जलइति।जलएवेत्यर्थः।असौस्नेहः।ननुपृथिव्यामपितैलेस्नेहउपलभ्यते।नचासौजलीयस्तथासतिदहनप्रातिकूल्यप्रसंगात्अतआह।तैलांतरइति।तत्प्रकर्षात्॥स्नेहप्र

परमाणौजलेनित्यमन्यत्रानित्यमुच्यते॥१५६॥नैमित्तिकंवन्हियोगात्तपनीयघृतादिषु॥द्रवत्वंस्पन्दनेहेतुर्निमित्तंसंग्रहेनुतत्॥१५७॥स्नेहोजलेसनित्योणावनित्योचयविन्यसौ॥तैलांतरेतत्प्रकर्षाद्दहनस्यानुकूलता॥१५८॥संस्कारभेदोवेगाख्यस्थितिस्थापकभावने॥मूर्त्तमात्रेनुवेगःस्यात्कर्मतोवेगतःक्वचित्॥१५९॥स्थितिस्थापकसंस्कारःस्पर्शवत्येवकेचिच्चतुर्ष्वपि॥अतीन्द्रियोसौविज्ञेयःक्वचित्स्पन्देपिकारणम्॥१६०॥

र्षानैलेउपलभ्यमानः स्नेहोपिजलीयएवतस्यप्रकृष्टत्वादग्नेरानुकूल्यम्।अपकृष्टस्नेहं हिजलंवन्हिंनाशयतीतिभावः।संस्कारंनिरूपयति।संस्कारभेदइतिवेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविधइत्यर्थः॥मूर्त्तमात्रइति।कर्मजवेगजभेदाद्वेगोद्विविधइत्यर्थः।शरीरादेर्हिनोदनजनितेनकर्मणावेगोजन्यतेतेनचपूर्वकर्मनाशस्तदुत्तरकर्मैवमग्रेपि बिनाचवेगंकर्मणः प्रतिबंधकत्वात्पूर्वकर्मनाशउत्तरकर्मोत्पत्तिश्चनस्यात्।यत्रचवेगबलाकपालेनजनितेघटेवेगोजन्यतेसवेगजोवेगः।स्थितिस्थापकेति।अतीन्द्रियइति॥आकृष्टशरादीनांपरित्यागेपुनर्गमनस्य।स्थितिस्थापकसाध्य

चतुर्वृष्टित्यादिषुस्थितिस्थापकंकेचिन्मन्यंतेतदप्रमाणमितिभावः।असौस्थितिस्थापकः क्वचिदाकृष्टशरत्वादौ॥ भावनाख्यइति॥तस्यसं-
स्कारस्योपेक्षात्मकत्वानात्मसंस्कारानुत्पत्तेरुपेक्षानात्मकइत्युक्तंतत्संशयानस्यानुत्पत्तेर्निश्चयइत्युक्तनेनोपेक्षान्यनिश्चयत्वेनसंस्कारंप्रति
हेतुतेतिभावः।ननुस्मरणंप्रत्युपेक्षान्यनिश्चयत्वेनहेतुत्वंतेनोपेक्षादिस्थलेनस्मरणम्।इत्यच्चसंस्कारंप्रतिज्ञानत्वेनैवहेतुतास्त्वितिचेन्न।विनिगमनाविरहेणापिसंस्कारंप्रतिउपेक्षान्यनिश्चयत्वेहेतुतायाःसिद्धत्वात्।किंचोपेक्षास्थलेसंस्कारकल्पनायाः गुरुत्वात्संस्कारंप्रति
उपेक्षान्यत्वेनहेतुतायाः सिद्धत्वात्।असौसंस्कारः।तत्रप्रमाणंदर्शयति।स्मरणइति।यतःस्मरणंप्रत्यभिज्ञानंचजनयत्यतःसंस्कारः क-
ल्प्यते॥विनाव्यापारंपूर्वानुभवस्यस्मरणादिजननेऽसामर्थ्यात्।स्वस्वव्यापारान्यतराभावेकारणत्वासंभवात्।नचप्रत्यभिज्ञा-प्रतितन्त

भावनाख्यस्तुसंस्कारोजीवच्छरीरतीन्द्रियः॥उपेक्षानात्मकस्तस्यनिश्चयःकारणंभवेत्॥१६१॥स्मरणेप्रत्यभिज्ञायामप्यसौहेतुरु
च्यते॥धर्म्मोधर्मोवदृष्टंस्याद्धर्मःस्वर्गादिसाधने॥१६२॥गङ्गास्नानादियागादिव्यापारःसतुकीर्तितः॥ ॥ तत्संस्कारस्यहेतुत्वेप्रत्यभिज्ञा

याःसंस्कारजन्यत्वेनस्मृतित्वापत्तिरितिवाच्यम्।अप्रयोजकत्वात्पूर्वत्वनुद्बुद्धसंस्कारत्वात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्यहेतुत्वोपेक्षयातत्त
त्स्मरणस्यैवप्रत्यभिज्ञांप्रतिहेतुत्वंकल्प्यतइत्याहुः॥अदृष्टंनिरूपयति।धर्मेति।स्वर्गादीति।स्वर्गादिसकलसुखानांस्वर्गसाधनीभूतशरीरा
दीनांचसाधनंधर्मइत्यर्थः।तत्रप्रमाणंदर्शयितुमाह।गङ्गास्नानेति॥यागादिव्यापारतयाहिधर्मःकल्प्यते।अन्यथायागादीनांचिरंविनष्टा
यानिर्व्यापारतयाचकालान्तरभाविस्वर्गजनकत्वेन स्यात्।तदुक्तमाचार्यैः।चिरध्वस्तफलायालंनकर्मातिशयंविनेति।ननुयागध्वंसएवव्या
पारःस्यात्।नचप्रतियोगितत्।ध्वंसयोरेकत्राजनकत्वंसर्वत्रतथात्वेमानाभावात्।नचत्वन्मतेफलानन्त्यंमन्मतेचरमफलस्यापूर्वनाशक

त्वान्नतथात्वमितिवाच्यम्।कालविशेषस्यसहकारित्वादित्यतआह। गङ्गास्नानेति। गङ्गास्नानस्यहिस्वर्गजनकत्वेऽनेनानांजलसंयोगध्वंसानां
व्यापारत्वमपेक्ष्यैकमपूर्वमेवकल्प्यतेलाघवादितिभावः।ननुध्वंसोपिनव्यापारोस्तु।नचनिर्व्यापारस्यचिरध्वस्तस्यकथंकारणत्वमितिवाच्यम्॥
अनन्यथासिद्धनियतपूर्ववर्त्तित्वस्यतत्रापिसत्त्वात्॥अव्यवहितपूर्ववर्त्तित्वंहिचक्षुःसंयोगादेःकारणत्वं ननुसर्वत्रकार्यकालवर्त्तित्वमिवस
मवायिकारणस्यकारणत्वेदृत्यतआह।कर्मनाशेति।यदिहि अपूर्वस्यात्तदाकर्मनाशाज्जलस्पर्शादिनानाश्यत्वंधर्मस्यनस्यात्।नहितेनयागा
देर्नाशःप्रतिबंधोवाकर्तुंशक्यतेनतस्यपूर्वमेवनष्टत्वादितिभावः।एतेनदेवतापीतेरेवफलत्वमित्यपास्तम्।गङ्गास्नानादौसर्वत्रदेवतापीतेरसंभ
वाच्च।देवतायाश्चेतनत्वेपितत्प्रीतेरनुदृश्यत्वात्प्रीतेःसुखरूपत्वेन विष्णुप्रीत्यादौतदसम्भवात्।जन्यसुखस्यतत्राभावात्।तेनविष्णुप्रीति

कर्मनाशाज्जलस्पर्शादिनानाश्यस्त्वसौमतः॥अधर्मोनरकादीनांहेतुर्निन्दितकर्म्मजः॥प्रायश्चित्तादिनाश्योसौजीववृत्तीत्विमौगुणौ १६४
एतौतुवासनाजन्यौज्ञानादपिविनश्यतः॥शब्दोध्वनिश्चवर्णश्चमृदङ्गादिभवोध्वनिः॥१६५॥कंठसंयोगादिजन्यावर्णास्तिकादयोमताः

जन्यत्वेनपराभिमतस्वर्गादिरेवविष्णुप्रीतिशब्देननलक्ष्यते।अधर्मेति।नरकादिसकलदुःखानांनारकीयशरीरादीनांचसाधनमधर्मइत्यर्थः॥
तत्रप्रमाणमाह।प्रायश्चित्तेति।यदित्वधर्मोनस्यात्तदाप्रायश्चित्तादिनानाश्यत्वंनस्यात् नहितेनब्रह्महननादीनांनाशःप्रतिबंधोवाविधातुं
शक्यते तस्यपूर्वमेवनष्टत्वादितिभावः।जीवेति। ईश्वरस्यधर्माधर्मौभावादितिभावः। इमौधर्माधर्मौ।वासनेति। अतोज्ञानिनाकृते अपिसुकृ
तदुष्कृतकर्मणीनफलायालमितिभावः।ज्ञानादपीति।अपिनाभोगपरिग्रहः।ननुतत्त्वज्ञानस्यकथंधर्माधर्मनाशकत्वंनाभुक्तंक्षीयतेकर्मकं
ल्पकोटिशतैरपीतिवचनविरोधात्।इत्थंचतत्त्वज्ञानिनांप्रतिकाय व्यूहेनसकलकर्मणां भोगेनक्षयइतिचेन्न।तत्रभोगस्यवेदबोधित

ज्ञानाकृतकर्मणां नाशकत्वात्।

कथमन्यथा प्रायश्चित्तादिनाकर्मणां नाशः। तदुक्तं ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन। क्षीयंते चास्यकर्माणि तस्मिन्दृष्टेपरावरे इति। ननुतत्त्वज्ञानि
नस्तर्हिशरीरावस्थानंसुखदुःखादिकंचनस्यात्। ज्ञानेनसर्वेषांकर्मणां नाशादिति चेन्न। प्रारब्धेनकर्मणामेवनाशात्। तत्तच्छरीरभोगजनकंहियः=
त्कर्मतत्प्रारब्धंतदभिप्रायमेवनाभुक्तमिति वचनमिति। शब्दं निरूपयति। शब्दइति॥ नभोवृत्तिःआकाशसमवेतः। दूरस्थशब्दस्याग्रहणादोह
श्रोत्रेति। ननुमृदङ्गाद्यवच्छेदेनोत्पन्नेशब्देश्रोत्रेकथमुत्पत्तिरतआह। वीचीति। आद्यशब्देनबहिर्देशदिगवच्छिन्नो न्यशब्द स्तेनैवशब्देनजन्य
तेतेनचापरस्तद्द्यापकः एवंक्रमेणश्रोत्रोत्पन्नोगृह्यतइति ६५ कदम्बेति। आद्यशब्दाद्दशदिक्कदशशब्दाउत्पद्यन्ते तैश्चान्येदशशब्दाउत्पद्यन्तेइ

सर्वे शब्दोनभोवृत्तिःश्रोत्रोत्पन्नस्तुगृह्यते॥६६॥ वीचीतरङ्गन्यायेननदुत्पत्तिस्तुकीर्तिता ॥कदम्बगोलकन्यायादुत्पत्तिःकस्यचिन्मते॥
॥६७॥उत्पन्नःकोविनष्टः कइतिबुद्धेरनित्यता॥सोयंकइतिबुद्धिस्तुसाजात्यमवलम्बते॥तदेवौषधमित्याद्यासजातीयेपिदर्शनात्॥
॥ ७ ॥ इतिश्रीविश्वनाथपञ्चाननकृतकारिकावलीसमाप्ता॥ ७ ॥ ७ ॥ ७ ॥

तिभावः। अस्मिन्मतेकल्पनागौरवादुक्तं कस्यचिन्मतइति। ननुशब्दस्यनित्यत्वादुत्पत्तिकथनमसंगतमत्राह। उत्पन्नेति। शब्दानामुत्पादवि
नाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः। ननुसएवायंककारइत्यादिप्रत्यभिज्ञानाच्छब्दानांनित्यत्वम्। इत्यञ्चोत्पादविनाशबुद्धिर्भ्रमरूपेवेत्य
तआह। सोयमिति। साजात्यमिति। तत्रप्रत्यभिज्ञानस्यतत्सजातीयत्वविषयोनतुतद्व्यक्त्यभेदोविषयः। उक्तप्रतीतिविरोधात्। इत्थञ्चहूयोरपिप्रती
त्योरभ्रमत्वमिति। ननुसजातीयेसोयमितिप्रत्यभिज्ञाकुत्रदृष्टेत्यतआह॥ तदेवेति। यदौषधमन्येनकृतंतदौषधंमयापिकृतमित्यादिदर्शनादितिभा
वः॥ ॥ इतिश्रीमहोपाध्यायविद्यानिवासभट्टाचार्यपुत्रश्रीयुतविश्वनाथपञ्चाननभट्टाचार्यविरचितासिद्धान्तमुक्तावली समाप्ता॥ ॥ शुभम् ॥

वाराणसीप्रसादस्यनियोगेनतुयत्नतः॥ काशीसंस्कृतमुद्रायामंकितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपर श्रीवि

श्वनाथजीकेपास महाराजशिवलालदुबेजीकेमकानमेकाशीसंस्कृतमुद्रयन्त्रमेछपी जिनकोलेनाहोयउन्होंने

इतिकारिकावलीसहितसिद्धान्तमुक्तावलीसमाप्तिमगमत्॥ ॥

इसछापेखानेकेकार्यसम्पादक श्रीयुतबाबूवाराणसीप्रसादयाकचौरीगलीमेभाईप्रतापसिंहजीकेदुका

नपरमिलेगीसंवत्१९३१